विदग्धमुखमण्डनम्

विद्वन्मनोहराख्यटीकासहितम्

नं० ६४२ - घ

पत्राणि - ९० (नवतिः)

नं० ६४२ — घ

विदग्धमुखमण्डनम्

विद्वन्मनोहराख्यटीका सहितम्

पत्राणि ९० (नवतिः)

का

॥ विदग्धमुखमंडन ॥ घ० ३१

१८००

कि॰मु॰मं॰
टी॰
१

श्रीगणेशायनमः॥श्रीशंप्रणम्यगुरुंगोकुलनाथसंज्ञं नाराभिधेनकविना शिवराजधान्यां ॥विद्वज्जनोपकृतये क्रियतेस्फुटार्थाटीकावि
दग्धमुखमंडनसंज्ञकस्य॥१॥जैनकृतेस्मिन्ग्रंथेसम्यग्ज्ञातुंमनोयदाविज्ञाः॥विद्वन्मनोहराख्यां दृष्टुं यत्नंतदाकुरुत॥२॥विमत्सरा
णांविदुषांचित्तेटीकामयाकृता॥मुदंवितनुतांनित्यमेषाविद्वन्मनोहरा॥३॥इहग्रंथस्यकर्त्तानिर्विघ्नपरिसमाप्त्यर्थंकायिक
वाचिकमानसिकपापापहारिरूपंस्वेष्टदेवताप्रशंसात्मकंमंगलमाचरति ॥सिद्धौषधानीति॥शौद्धोदनेःशाक्यसिंहस्यप्रव
चनानियद्वाप्रवचनानिवेदाख्यप्रमाणाभूतानिततं।त्राणीति यावत् चिरं चिरकालंजयंतिसर्वोत्कर्षेणवर्तंत इत्यर्थः॥शाा
क्यसिंहःसर्वार्थसिद्धःशौद्धोदनिश्चसइत्यमरः॥स्मृतंप्रवचनंवेदेप्रकृष्टवचनेपिचेतिविश्वः॥कीदृशिप्रवचनानि॥भवदुःखम
हागदानांसिद्धौषधानि॥भवस्यसंसारस्य जन्मनोवादुःखान्येव महागदा महारोगा स्तेषांसिद्धौषधानि॥ औषधांतरसंयो
गापेक्षारहितानीत्यर्थः॥भवःक्षेमेशसंसार सत्ता संप्राप्ति जन्मसु इति मेदिनी॥रोगव्याधिगदामयइत्यमरः॥महारोगा राम
१

स्तुदेहजा भवंति एतेन कायिकंपापहारित्वमुक्तं भवति पुनः कीदृंशि पुण्यात्मनां परमकर्णरसायनानि पुण्यात्मनां सु
कृतीनां परमानि उत्कृष्टानि वतानि कर्णयोः रसायनानि स्वादमार्गभूतानि सुकृतीनामुत्कृष्टश्रवणपुटपेयानीत्य
र्थः सुकृतीपुण्यवान्धन्यो इत्यमरः रसोगंधरसेस्वादे तिक्तादौ विषरागयोः श्रृंगारादौरसोवीर्यदेहधात्वंबुपारदइति विश्वः अय

श्रीगणेशाय नमः ॥ सिद्धौषधानि भवदुःखमहागदानां पुण्यात्मनां परमकर्णरसायनानि ॥ प्रक्षालनै
नि कसलिलानि मनोमलानां शौद्धोदनेर्प्रवचनानि चिरं जयंति ॥१॥

नं वर्त्ममार्गोध्व पंथानं पदवी स्तृती इत्यमरः शब्दग्राहित्वं कर्णद्वारा भवति एतेन वाचनिकपापापहारित्वमुक्तं पुनः कीदृंशि म
ए नोमलानां प्रक्षालनैकसलिलानि मनसि चित्ते मलं येषां ते मनोमला मलिनचित्तास्तेषां प्रकर्षेणाक्षालनार्थं निर्मलीकरणार्थं ए
कानि मुख्यानि वतानि सलिलानि जलानि तत्पेक्षारहितानीत्यर्थः एके मुख्यान्यकेवलइत्यमरः एतेन मनोनिर्मलीकरणात्मानसिकपापाप
हारित्वमुक्तं ननु शौद्धोदनेस्वरूपादि तत्कमेप्रशंसादिकमनुक्त्वाकविस्तत्प्रवचनप्रशंसां कथमुक्तवानिति अत्रोच्यते महापुरुषाणां

वि॰मु॰मं॰

२

2

स्वरूपादिकं ततक्रियादिकं च सर्वमैहिकत्वादध्रुवं कञ्चित्कं च वचनं तु तथ्यमेव तदुक्तं भागवते। ईश्वराणां वचस्तथ्यं तथैवाचरितं क॰
चित्। इद्धानीवचनं पथ्यमिति नीतेः एतेन महाशयवाक्यपरिपालनाद्द्वारा सकलाभीष्टसिद्धिः सूचितेति भावः। साधवो हृदयं मह्य
मिति विस्मृतिं स्मृत्वा द्वितीयश्लोकार्द्धेन साधून्प्रस्तौति उत्तरार्द्धेन च कवेर्गिरः प्रस्तौति ॥ १ ॥ जयंतीति। सुकृतस्य पुण्यस्यैकं मु॰
ख्यं भाजनं पात्रं यथा स्यात्तथा संतः साधवो जयंति। कीदृशाः। परार्थसंपादनसद्व्रतस्थिता। परेषां अन्येषामर्थः कार्यं परार्थः

जयंति संतः सुकृतैकभाजनं परार्थसंपादनसद्व्रतस्थिता करस्थनीरोपमविश्वदर्शिनो जयंति वै
दग्ध्यभवः कवेर्गिरः २

परार्थस्य संपादनमेव सद्व्रतं साधुव्रतं परार्थसंपादनसद्व्रतं तत्र तिष्ठंतीति तथा। सत्सा
धौ विद्यमाने चेत्यमरः। कवेः काव्यकर्तुः पंडितस्य गिरो वाचो जयंति। संख्यावान्पंडितः कविः। गीर्वाग्वाणी सरस्वतीत्य
मरः। कीदृशस्य कवेः। करे तिष्ठतीति करस्थं करस्थं च तत् नीरं जलं करस्थ नीरं करस्थनीरस्य हस्तामलकवदुपमा
यस्मिंस्तत्करस्थनीरोपमं। करस्थनीरोपमं विश्वं पश्यंतीति करस्थनीरोपमविश्वदर्शी तस्य करस्थनीरोपम
विश्वदर्शिनः। कीदृश्यो गिरः। वैदग्ध्यभवः। वैदग्ध्यस्य भावो वैदग्ध्यं चातुर्यं तस्मादुद्भूतत्पत्तिर्यासां ताः २

रामः
२

खलस्वभावमाह आक्रान्तेति महता उपलेन पाषाणेन आक्रान्ता इव दुर्वाससा मुनिना स्वधा च स्वाधिं गुणान् न वाच्या इति कृतशापेन सातत्यं नित्यं जतुना लाक्षया कृतमुद्रेव पिधेवः मूर्छां मोहं नीता प्राधिता इव। अतनुभिः स्थूलाभिः रज्जुभिः बद्धा इव

आक्रान्तेव महोपलेन मुनिना शप्तेन दुर्वाससा सातत्यं बत मुद्रितेव जतुना नीतेव मूर्छां विषैः॥ बद्धेवातनुरज्जुभिः परगुणान्वक्तुं न शक्ता सती जिह्वा लोहशलाकया खलमुखे विद्धेव संलक्ष्यते ॥३॥

परेषां अन्येषां गुणान् वक्तुं न समर्था सती खलमुखे जिह्वा रसना लोहश-लाकया शलाकया विद्धा कृतवेधेव इव संलक्ष्यते विज्ञायते ॥ ३

बि· मु· मं·

३

3

जगति

इह संसारे सतां सततं उपकारिणि उपकारकर्तरि उपकृतिं उपकारं कुर्वन्तः एव एव कृतज्ञाः कृतवेदिनः सुधियः विद्वांसः सन्त्येव नात्र संशयः

तेषां न्यूनतेति भावः। सुकृतस्य धर्मस्य परिपाकः फलं तत्प्रशंसनीयाः ते सन्तः

इहाने के सत्यं सततमुपकारिण्युपकृतिं कृतज्ञाः कुर्वन्ति जगति निवसन्त्येव सुधि

यः कियन्तस्ते सन्तः सुकृतपरिपाकप्रशंसनीयाः विना स्वार्थं येषां भवति परकृत्यव्यास

निता ४

तु कियन्त एव येषां स्वार्थं विना परकृत्येषु अन्येषां कार्यविधाने

व्यसनिता व्यसन सद्भावो भवति. ४

सज्जनासज्जनौ समं वंदते एष इति ॥ असज्जनः ॥ असत्पुरुषः सज्जनः

सत्पुरुषः तौ द्वौ समं युगपत् वन्दे तदग्रे एषः ॥ अञ्जलिः करसम्पुटः कीदृशो तौ नितान्तं प्रीति

एषोञ्जलिः सममसज्जनसज्जनौ वन्दे नितान्तकुटिलप्रगुणस्वभावौ एकं नवभिसंहित

प्रीत्या परमनिर्वृतिपात्रभूतं ॥

शयेन प्रेमेण कुटिलः अन्तर्बहिर्विषमः प्रगुणः सरलश्च स्वभावो ययोस्तौ तयोरेकं भियो भयेन

भीतिर्भीः साध्वसं भयं इत्यमरः ॥ अभिनवः नूतनोऽकारणः संहितः योजितः वैरभावो येन तं परं

अन्यं सज्जनं प्रीत्या प्रेमणा परमानिर्वृतेः पात्रभूतम् आधारभूतं वन्दे ॥

5

निषेधति किमिति अथवे पक्षान्तरे इह अत्र ग्रन्थे खलजनानां असत्पुरुषाणां प्रणतौ
किं फलं स्यात् । यदि गुणज्ञः गुणानां काव्यीयानां वेत्ता सुपुरुषः मां [illegible] करोति
किं मे अथवा खलजनप्रणताविह स्यात् स स्वीकरोति सुजनो यदि मां गुणज्ञः चन्द्रे
ण चारुचरितेन विकाशितं यत्संकोचितं भवति किं कुमुदं तमोभिः ६
अर्थान्तरं न्यस्यति चारुचरितेन उच्चारित्रेण यत् प्रकाशितं [illegible] विकाशितं
तत् कुमुदं रात्रिकमलं [illegible] किं तमोभिः संकोचितं निमीलितं भवति अपि नेति
का।कु: ६

सुजनस्वीकाररूपमनुग्रहमवलंब्य कविर्ग्रंथस्याभिधानं प्रकटयन्नाह। प्रीत्यै सतामिति।। अहं विदग्धमुखमंडनं नाम
ग्रंथं वक्ष्ये। किं कृत्वा गूढरचनां दुर्गेयघटनां संत्यज्य त्यक्त्वा प्रतिभा बुद्धिरुत्कर्षस्तदनुरूपं यथा स्यात्तथा वक्ष्ये किम
र्थं सतां प्रीत्यै साधूनां परितोषाय कीदृशोऽहं तदनुभावगतावसादः तेषां साधूनां अनुभावो अनुग्रहस्तदनुभावस्तेन ग

प्रीत्यै सतां तदनुभावगतावसादः संत्यज्य गूढरचनां प्रतिभानुरूपं क्षिप्रावबोधकरणक्षममी
क्षितार्थं वक्ष्ये विदग्धमुखमंडनमप्रपंचं ७ यद्यस्ति सभामध्ये स्थातुं वक्तुं मनस्तदा सुधियः
तांबूलमिव गृहीत्वा विदग्धमुखमंडनं विश्रान्तः ८

तोऽवसादो विषादो यस्य सः कीदृशं विदग्धमु
खमंडनं क्षिप्रावबोधकरणक्षमं क्षिप्रं शीघ्रं अवबोधः सम्यग्ज्ञानं तत्कारणक्षमं तत्संपादनसमर्थं।। पुनः कीदृशं ईक्षि
तार्थं ईक्षितो दृष्टः अर्थो यस्मिंस्तत्। ईक्षदर्शनांकनयाः ईप्सितार्थमिति पाठे अभिलषितार्थं। पु॰ की॰। अप्रपंचं नवि
द्यते प्रपंचो विस्तारो यस्मिंस्तत् अविस्तरमित्यर्थः। विपर्यासे च विस्तारे प्रपंच इत्यमरः।। ७।। अमुना ग्रंथकारः

5

ग्रंथप्रचारार्थं साभिप्रायमाह। यदीति। हे सुधियो विद्वांसः यदि सभामध्ये स्थातुं वक्तुं मनश्चित्तमस्ति। तदा स्मत्कृतिदग्ध
मुखमंडनसंज्ञकं ग्रंथं मुखे तांबूलमिव गृहीत्वा विशत उपविशत। उपवेशनेऽ क्रमं चकेन चित्त। तांबूलेन विना राजन्
जडीभूता सरस्वती ॥ निःसरेन्न मुखाद्वाणी गृहात्कुलवधूरिवेति तांबूलेन मनःप्रसादस्तेनाभ्यस्तविद्योदयस्तेन स
दसि जयस्तद्वद्विदग्धमुखमंडनमित्यर्थः ॥८॥ कविरग्रे वक्ष्यमाणान्प्रमेयाननुक्रामति ॥ प्राहुरिति। तद्विदः दूति
शेषः व्यस्तादीनां लक्षणमग्रे वक्ष्यते ॥४॥ प्राहुर्व्यस्तं १ समस्तं च २ द्विर्व्यस्तं ३ द्विःसमस्तकं ४ तथा
व्यस्तसमस्तं च ५ द्विर्व्यस्तकसमस्तकं ६ ९ सद्विसमस्तकव्यस्त ७ मेकालापं ८ प्रभिन्नकं ९
भेद्यभेदक १० मोजस्वि ११ सालंकारं १२ सकौतुकं १३ १० प्रश्नोत्तरसमं १४ पृष्टप्रश्नं १५ भग्नोत्तरं तथा १६
आदि १७ मध्योत्तरा रव्येदे १८ अंतोत्तरा १९ मतष्यरं १९ ११ कथितापह्नुतिं चैव २० विषमं २१ वृत्तनामकं २२

नामाख्यानंच २३ नार्थकंच २४ सौत्रं २५ शाब्दीय २६ शास्त्रजे २७ १२ वर्णावाक्योत्तरे तद्वत् २८ २९ श्लोको
त्तरमतथ्यरम् ३० खंड ३१ पादोत्तरे ३२ चक्रं ३३ पद्मं ३४ काकपदं तथा ३५ १३ गोमूत्रीं ३६ सर्वतोभद्रं ३७ ग
तप्रत्यागतं वहु ३८ वर्द्धमानाक्षरं तद्व ३९ द्धीयमानाक्षरं तथा ४० १४ शृंखलां ४१ नागपाशंच ४२
चित्रं ४३ संशुद्धमेवच ४४ प्रहेलिका ४५ तथा हृद्यं ४६ कालसारादिवर्णितं ४७ १५ अजमारादि
कं गूढं ४८ पद ४९ पादार्थ ५० गूढकं ५१ स्तुति निंदां ५२ तथा द्व्यर्थं ५३ सहापह्नुति ५४ विंदुमत् ५५ १६
क्रिया ५६ कारक ५७ संबंधगुप्ता ५८ न्यामंत्रितस्यच ५९ गुप्तं तथा समासस्य ६० लिंगस्य ६१ वच
नस्यच ६२ १७ मात्रा ६३ विंदु ६४ विसर्गाणां ६५ च्युतकाक्षरस्यच ६६ स्थान ६७ व्यंजनयोश्चापि ६८

कारकाणि यथा कर्तृकर्मकरणसंप्रदानं दानं तथैव च । अपादानाधिकरण
मित्याहुः कारकाणि षट् ॥ कारकगुप्तेन कर्त्रादि षट् गुप्तानि लभ्यंते २

वि॰कु॰मं॰
टी॰
६
6

च्युतदत्ताक्षरं तथा ॥ १८ ॥ इत्यौद्देशिकं ॥ पृष्टं पदविभागेन केवलेनैव यद्भवेत् विदुर्व्यस्तं
समस्तं यत्समुदायेन पृच्छ्यते १९ पू जायां किं पदं प्रोक्तं मस्तनं को भर्त्सुरः क आयुधत वि
याख्यातः फलं वा सुरविद्विषः २० सुनासीरः ॥ को दुराढ्यस्य मोहाय का प्रिया मुरविद्विषः
पदं प्रश्नवितर्के किं कीदृं नद्धदम्भूषणाम् २१ रामानुरागः ॥ इति व्य जातिः स
ति । आद्युत्तरं मध्योत्तरं चेति द्वे ११ ॥ शाब्दीयं शास्त्रजं चेत्यादि विभागोऽकतरए वोन्नेयः ॥ १२ ॥ इत्यौद्देशिकं ॥ तत्र ताव
देकेन श्लोकेन व्यस्तसमस्तजात्योर्लक्षणमाह ॥ पृष्टमिति ॥ विभक्त्यंतं पदं ॥ पदानां विभागः पदविभागः तेन केव
लेन पदविभागेन यत्पृष्टं प्रश्नं प्रश्नविदो व्यस्तसंज्ञं विदुर्जानीयुः यत्समुदायेन पदविभागाभावेन पृच्छ्यते तं प्रश्नं स
मस्तसंज्ञं विदुः ॥ १८ ॥ तत्र तयोस्ताव व्यस्तप्रश्नस्योदाहरणद्वयमाह द्वाभ्यां ॥ पूजायामिति । कश्चुन राम
६

पृच्छति। पूजायां किंपदमितिपृष्टे सुनासीर इत्येकस्मिन्पदे पदविभागेन सु इति प्रत्युत्तरं ददाति। सु इत्यव्ययं पूजायां। पूज
नेस्वती त्यमरः। पुनः पृच्छति। अस्तनं स्तन रहितं उरोवक्षः को विभर्ति धारयतीति पृष्टे ना· पुमानित्युत्तरं नृशब्दस्य
ना· नरौ इतिरूपं। पुनः पृच्छति। प्रलंबासुरविद्विषो बलभद्रः तस्य आयुधमस्त्रं तस्य भाव· आयुधता· तयाख्यात इति
पृष्टे सीरो हलमित्युत्तरं। बलभद्रः प्रलंबघ्न इत्यमरः॥ २०॥ क इति। दुःखेन आढ्यो दुराढ्यो निर्धनस्तस्य मोहाय अ
ज्ञानाय क इति पृष्टे रामानुराग इति पदविभागेन रा इति प्रत्युत्तरं रा· वित्तं। रैशब्दस्य राः रायौ रायः इति। रा पुंसि स्वर्णे
वित्तयो रिति मेदिनी। पुनः पृच्छति मुरविद्विषो मुरारेः का प्रिया केति पृष्टे· प्रत्युत्तरं· मा· लक्ष्मीः इंदिरा लोकमा
तामे त्यमरः पुनः पृच्छति। प्रश्न वितर्क — हापोहस्तस्मिन्प्रश्न। वितर्के किंपदमिति पृष्टे प्रत्युत्तरं· नु· नु स्या
त्प्रश्नवितर्कयो रिति हलायुधः। पुनः पृच्छति। दंतच्छदस्याधरस्य भूषणमलंकारः क· इति प्रश्ने प्रत्युत्तरं·
रागः रक्तिमा इति व्यस्तजातिः॥ २१॥

वि॰मु॰मं॰ इदानींसमस्तप्रबंधस्योदाहरणद्वयंश्लोकद्वयेनाह ॥ अपीति ॥ द्विजिह्वैःसर्पैःसेविता अपिकस्मिन्नपिकाले के विकारं विकृ

टी॰ तिनयांति नप्राप्नुवंति ।याप्रापणे ।कीदृशाः विच्छिद्यमानाः छेदनमोटनघर्षणादिभिस्तनुःशरीरंयेषांते विच्छिद्यमानतनवः

७ स्वगुणैः सौरभ्यशैत्यादिभिरधिकं यथास्यात्तथा विराजंते दीप्यंते ।राजृदीप्तौ ।द्विजिह्वोसर्पसूचकावित्यमरः ।एवंसामस्त्येनपृ

7 ष्टे प्रत्युत्तरं ।मलयतरवः ।अर्थाच्चंदनानि ॥२२॥ अनिभृतेति ।पुंसांपुरुषाणां हृदयहारी चित्तहारकः कोभवतीतिपृष्टेप्रत्युत्तरं

पि अपिसेविताद्विजिह्वैःकदाकेयांतिनविकारं विच्छिद्यमाननतनवःस्वगुणैरधिविराजंते २२ मलयतरवः कं

अनिभृतकोकिलनिस्वनमुखरितसहकारकाननःपुंसां कोभवतिहृदयहारीमधुकरझंकारिकंकेल्लि २३

मधुसमयः समस्तजातिः मधुसमयः वसंतकालः ।दैत्येचैत्रेवसंतेचमधुःपुंसिमधुद्रुमः इतिमेदिनी ।कालोदि

ष्टोप्यनेहापिसमयो [illegible] वीत्यमरः ।कीदृशोमधुसमयः ।अनिभृता अविनीता अर्थान्मत्ताये कोकिलाःपिकास्ते

षां निस्वनैः शब्दैर्मुखरितानिमुखरीकृतानि सहकारकाननानि अतिसौरभाम्रवनानियत्रसः ।निभृतविनीतप्रश्रिताः

समा इत्यमरः ।सहकारोतिसौरभइत्यमरः ।पु॰कीदृशः ।मधुकरैर्भ्रमरैःझंकारिणःशब्दायमानाः कंकेल्लयः अशोकतरवोय राम:

७

त्रसः। कंकेल्लिर्वंजुलोऽशोक इति हलायुधः। इति समस्तजातिः ॥२३॥ इदानीं द्विर्व्यस्तद्विःसमस्तजात्योर्लक्षणमाह। व्यस्तमिति
यद्व्यस्तं प्रागुक्तरीत्या अथवा समस्तं प्रागुक्तसमस्तरीत्या। समासपदभंगतः समासस्य पदानि समासपदानि तेषां भंगः खंडनं तरंगो
वा समासपदकल्पना [illegible]रंग इति यावत् तस्मात् द्विःपृष्टं द्विवारं पृष्टं सततदेव क्रमेण द्विर्व्यस्तसंज्ञकं द्विःसमस्तसंज्ञकं च प्र
श्नं स्यात्। तदेतयोरुदाहरणद्वये स्पष्टीकृतं कविना। तद्यथा॥ द्विर्व्यस्तस्याद्योदाहरणे काली चासौ कापालिकश्च कालि

व्यस्तं समस्तमथवा समासपदभंगतः द्विःपृष्टं यत्तदेव स्याद्द्विर्व्यस्तं द्विःसमस्तकम् ॥२४॥

कापालिकस्तस्य मठः कालिकापालिकमठ इत्यत्र कर्मधारयषष्ठीतत्पुरुषे कालिका·अपालि·कमठ इत्येकः समा
सपदभंग[illegible]ः। पुनस्तस्मिन्नेवोत्तरे। कालि·कापाला लिकमठ इत्यपरः। समासपदभंगो द्विवारं व्यस्तरीत्या पृष्टत्वा द्विर्व्य
स्तसंज्ञः प्रश्न उक्तः द्वितीयोदाहरणेऽपि नवारितत्रवारित इत्यत्र नञ्तत्पुरुषे अवारितोरणो इत्येकः समासपदपद
भंगः अवारितः रणो इत्यपरः समासपदभंगो द्विःपृष्टो द्विर्व्यस्तसंज्ञः। एवं द्विःसमस्तप्रश्नस्याद्योदाहरणे विव
राली नकुलीरा इत्यत्र द्वंद्वसमासे सामस्त्येन विश्ववरश्च आलीच नकुलीच इराचेत्येकः समासपद[illegible]भंगः। वि

वरेस्थानाः कुलीरायासुता इत्यपरः समासपदभंगो द्विवारं सामस्त्येन पृष्टत्वात् द्विःसमस्तसंज्ञः प्रश्नः द्वितीयोदाहरणेऽपि
कुवलयवनराजय इत्यत्र द्वंद्वे कुवलयस्य यवस्य नरस्य आजि श्चेत्येके समासपदभंगः। कुवलयानां वनानि कुवल
यवनानि तेषां राजय इत्यपरः समासपदभंगो द्विवारं सामस्त्येन पृष्टं सत् द्विःसमस्तसंज्ञ उक्त इत्यर्थः॥२४॥ तयोर्द्विर्व्य
स्तद्विःसमस्तयोस्ताव द्विर्व्यस्तप्रश्नस्याद्यमुदाहरणमाह॥ वर्षास्विति। वर्षासु शारद् कालेषु काभवतीति पृष्टे प्र
त्युत्तरं कालिका मेघजालमित्यर्थः मेघजालेऽपि कालिकेत्यमरः। स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा इत्यमरः

वर्षासु काभवति निर्मधु कीदृगब्जं शेषं बिभर्ति वसुधासहितं क एकः आमंत्रयस्व धरणीधरना
थपुत्रीं को त्रास्थिभस्मनि चितागजनाश्रयस्यात्॥२५॥ कालिका पालि कमठः

निर्मधु मधुहीनमब्जं कमलं कीदृगिति पृ[...]ष्टे प्रत्युत्तरं अपालि अपगता अलयो भ्रमरा यस्मात्तत्। क एको सुख्यः
वसुधासहितं पृथिव्यायुक्तं शेषं नागविशेषं बिभर्ति धरतीति पृष्टे प्रत्युत्तरं कमठः कूर्मः तदेवोत्तरं पुनः पृ
च्छति। धरणीधरनाथस्य हिमवतः पुत्रीमामंत्रयस्व आहूयस्वेति पृष्टे प्रत्यु[…]त्तरं कालि॰ हे हैमवति। काली

हैमवतीश्वरीत्यमरः। अत्रपृथिव्यां अस्थिभस्मभिर्निचिता निव्याप्तान्यंगानियेषां ते तादृशाश्चते जनाश्च अ
स्थिभस्मनिचितांगजनास्तेषामाश्रयः कः स्यादितिपृष्टे प्रत्युत्तरं कापालिकमठः। कापालिकस्यखल्वाट
स्यमठः शिष्यादिनिवासस्थानं। मठः छात्रादिनिलयो इत्यमरः॥२५॥ द्विर्व्यस्त प्रश्नस्य द्वितीयोदाहरणमा

कीदृशं वदमरुस्थलंमतं द्वारि कुत्रसतिभूषणंभवेत् ब्रूहिकांतसुभटः सुकार्मुकः कीदृ
शोभवतिकुत्रविद्विषाम्॥२६॥ अवारितोरणो॥ द्विर्व्यस्तजातिः॥

ह॥ कीदृशमिति। काचननायिका पृछति। हेकांतसुंदरमरुस्थलं धन्वदेशः कीदृशं वदेति पृष्टे प्रत्युत्तरं अ
वारि। नविद्यतेजलंयत्रतत्। समानौमरुधन्वानावित्यमरः। द्वारि अर्थात् गृहस्यवहिर्द्वारेकुत्रसतिकस्मिन्वि
द्यमाने भूषणंमंडनंभवेत् प्रत्युत्तरं तोरणे आम्रादिपल्लवकृतवितानविशेषे तोरणो स्त्रीवहिर्द्वारमित्यमरः
पुनः पृछति कार्मुकेणधनुषासहितः सुभटो योधाविद्विषांशत्रूणांकुत्रकीदृशोभवतीतिपृष्टे प्रत्युत्तरम्

वि॰मु॰मं॰
टी॰
९
9

ररोऽप्रवारितः संग्रामेवारयितुमशक्यः। भटायोद्धाश्च योधाश्च योद्धार इत्यमरः। अथास्त्रियांधनुश्चापोध
न्वशरासनकोदंडकार्मुकं॥ द्विट् विपक्षाहिता मित्र दस्युशात्रव शात्रव इत्यमरः॥ २६॥ द्विर्व्यस्तजातिः
पक्षिश्रेष्ठसखी बभ्रु सुरा वाच्या कथंवद ज्येष्ठे मासि गताः शोषं कीदृश्योऽल्पजला भुवः २७
विवरालीनकुलीराः॥ इदानीं कविः प्रागुक्तं द्विं समस्तप्रश्नस्याद्यमुदाहरणमाह॥ पक्षीति॥ क
श्चन पृच्छति। पक्ष्यादयः कथं वाच्याः पक्षी च श्रेष्ठश्च सखी च बभ्रुश्च सुरा च पक्षिश्रेष्ठसखी बभ्रुः सुराः
कथंवक्तव्या इति पृष्टे प्रत्युत्तरं। विवरालीनकुलीराः॥ विः पक्षी। विविष्किरपतत्रय इत्यमरः। वर श्रेष्ठ
आली सखी। नकुलो बभ्रुः स्त्रियां नकुली। इरा सुरा। आलिः सखी वयस्येत्यमरः। विपुलेन कुले विल्लो
बभ्रुः स्यात्पिंगले त्रिषु इति। इराभूवाक् सुराप्सु स्यादिति च। पुनरपि पृच्छति। ज्येष्ठे मासि अर्थान्नि
दाघकाले शोषं गताः। अतः अल्पजलाः। अल्पमुर्वरितं जलं यासु ताः भुवो भूम्यः कीदृश्यो वदेति पृष्टे
प्रत्युत्तरं तदेव विवरालीनकुलीरा इति विवरे बिले आलीनाः समंतान्निमग्नाः कुलीराः कर्कटाः रामः
९

यामुनाः। स्यात्कुलीरः कर्कटक इत्यमरः॥२७॥ द्विःसमस्तप्रश्नस्योदाहरणांतरमाह॥ विश्वंभरेति। क
न२ श्चित्पुरुषः कमपि पुरुषं पृच्छति। विश्वंभरा पृथ्वी। प्रलंबघ्नो बलभद्रः। व्रीहिः अर्थादन्नयवो गृह्यते। व्रीहिः
सामान्यधान्ये स्यादाशुधान्ये च पुंस्ययमिति मेदिनी मानुषो नरः संयत्तं युद्धं च। एताः विश्वंभरादयः क

विश्वंभराप्रलंबघ्नव्रीहिमानुषसंयतः कथं वाच्या भवंत्येता दिनादौ विकसंति का॥२८॥

कुवलयवनराजयः॥ द्विःसमस्तप्रश्नजातिः॥ कथं वाच्या भवंतीति पृष्टे प्रत्युत्तरं कुवलयवनराजयः। कुः पृथ्वी
वी गोत्रा कुः पृथिवी पृथ्वीत्यमरः। बलः संकर्षणः। संकर्षणः सीरपाणिः कालिंदीभेदनो बलः। यवोऽन्नविशेषः। शितशूकयवौ
समावित्यमरः। नरो मानुषः। आजिः समितिः स्त्रियां संयत्समित्याजिसमिद्युध इत्यमरः। पुनः सामस्त्येन तदेवोत्तरं पृ
च्छति। दिनादौ प्रातःकाले का विकसंति इति पृष्टे प्रत्युत्तरं तदेव कुवलयवनराजय इति कुवलयानामुत्पलानां वनानि
कुवलयवनानि तेषां राजयो लेखाः। स्यादुत्पलं कुवलयमित्यमरः। लेखास्तु राजय इति। इति द्विःसमस्तप्रश्नजातिः २८

इदानीं व्यस्तसमस्तप्रश्नस्य लक्षणमाह ॥ पृष्टमिति ॥ यत्पूर्वपदविभागेन पदविभागेन पृष्टं भवेत् । नतत्प्रश्नं उभयार्थप्रदर्श-
नात् उभययोर्व्यस्तसमस्तप्रश्नयोरर्थप्रदर्शनं उभयार्थप्रदर्शनं तस्मात् । तस्मात् व्यस्तसमस्तसंज्ञकं प्रश्नं विदुः जानीयुः
स्तद्विदद्वृतिशेषः ॥२८॥ व्यस्तसमस्ताद्यमुदाहरणं तावदाह । केति प्रियेण रहिता भर्त्रा हीना का वरांगना सुंदरी धा-
म्नि गृहे केन तनयेन पुत्रेण नंदिता सुखिता जातेति पृष्टे प्रत्युत्तरं शाकुंतलाभरतेन । शाकुंतला नाम्नी रा ज्ञी भरतनाम्ना

पृष्टं पदविभागेन समुदायेन यद्भवेत् विदुर्व्यस्तसमस्तं तदुभयार्थप्रदर्शनात् ॥२८॥ का प्रियेण रहिता व
रांगना धाम्नि केन तनयेन नंदिता कीदृशेन पुरुषेण पक्षिणां वंधनं समभिलष्यते सदा ॥३०॥ शाकुंतलाभरतेन

प्रश्न पुत्रेण । गृहे देहदीप्तिप्रभावाधामानीत्यमरः । पुनः समस्तरीत्या पृच्छति । सर्वदा कीदृशेन पुरुषेण पक्षिणां वंधनं समभिलष्यते वां-
छा क्रियते इति पृष्टे प्रत्युत्तरं । शाकुंतलाभरतेन । शाकुंतानां पक्षिणां लाभः शाकुंतलाभस्तत्र रतिर्यस्य स शाकुं-
तलाभरतस्तेन । शाकुंतिपक्षिशकुनि शाकुंतशकुन द्विजा इत्यमरः ॥३०॥

व्यस्तसमस्तप्रश्नस्यद्वितीयमुदाहरणमाह्। कीदृशमिति। कश्चिन्नराजपुरुषः कमपिराजानंपृच्छति। हेराजन्। हृदयहारीहृदयंगमंकूजितंमधुरध्वनिविशेषः कीदृशमितिपृष्टे प्रत्युत्तरं। कलं। अस्फुटमधुरध्वनिः। ध्वनौतुमधुरास्फुटेकलइत्यमरः। पुनः पृच्छति। यशासिकीर्तौभूपतेः पृथ्वीपतेः कः सखासुहृन्मतइतिपृष्टे प्रत्युत्तरं। कविः पं

कीदृशंहृदयहारिकूजितंकः सखायशसिभूपतेर्मतः कस्तवास्तिविपिनेभयाकुलः कीदृशश्च नभवेन्निशाकरः ॥ ३१॥ कलंकविरहितः ॥ इतिव्यस्तसमस्तजातिः॥

डितः। संख्यावान्पंडितः कविरित्यमरः पुनः पृच्छति नवविपिनेकाननेभयाकुलः भयविह्वलः कोस्तीतिपृष्टे प्रत्युत्तरं। अहितंशत्रुः। विपिनंकाननंबनमित्यमरः। पुनःपृच्छति कीदृशश्चनिशाकरश्चंद्रोनभवेदितिपृष्टे प्रत्युत्तरं। कलंकविरहितः। कलंकेनलांछनेन विरहितः विशेषेणरहितोनभवेदेव। कलंकांकौलांछनंचेत्यमरः॥ ३१॥ इतिव्यस्तसमस्तजातिः॥

वि॰द॰मु॰मं॰
टी॰
११

इदानीं द्विर्व्यस्तसमस्तप्रश्नस्य लक्षणमाह ॥ द्विर्व्यस्तमिति ॥ यत्पूर्वं द्विर्व्यस्तं पृष्टं पश्चात् यत् समुदायेन पृष्टं
भवेत् । एवं त्रिधाभिन्नं वारत्रयं पृष्टं तदेव प्रश्नं द्विर्व्यस्तसमस्तकं नाम प्रश्नमुक्तं कविभिरिति शेषः ॥ ३२ ॥ तावदेतस्य प्रथममु
दाहरणमाह ॥ काविति शंकरस्य वलयौ कौ इति पृष्टे प्रत्युत्तरं । अहीसर्पौ । वलयः प्रकोष्ठाभरणं । कटकं वलयो स्त्रियामि
त्यमरः पुनः पृच्छति । अपयोधरः अस्तनः कः प्रत्युत्तरं । ना पुमान् । स्तनमेघौ पयोधरौ । नियतं निश्चितं कीदृक् भूपः । परस्या

द्विर्व्यस्तमेव यत्पृष्टं समुदायेन तद्भवेत् त्रिधाभिन्नं तदेवोक्तं द्विर्व्यस्तकसमस्तकं ॥ ३२ ॥ कौ शंकरस्य वलयावप
योधरः कः कीदृक्परस्य नियतं वशमेति भूपः संबोधयोरगपतिं विजयी च कीदृग्दुर्योधनो न हि भवेद्वद कीदृ
शश्च ॥ ३३ ॥ अहीनाक्षतनयः ॥ न्यस्य वशं अधीनतामेति गच्छति प्रत्युत्तरं क्षतनयः क्षतः नयो नीतिर्यस्मात्सः नी
तिरहित इत्यर्थः पुनः पृच्छति । उरगपतिं सर्पराजानं संबोधयेति पृष्टे प्रत्युत्तरं हे अहीन हे वासुके सर्पराजस्तु वासुकिः । इनः स्व
र्येप्रभौ राज्ञीत्यमरः । च पुनः विजयी कीदृक् प्रत्युत्तरं अक्षतनयः समुदितनयः । च पुनरर्थे हे तावदवधारणे । दुर्योधनः कुरु
राजः कीदृशो न भवेदेव वदेति पृष्टे प्रत्युत्तरं अहीनाक्षतनयः अहीनाक्षस्यांधस्य तनयः न हीनाक्षस्य तनयः अहीनाक्षतनयः

[illegible] दुर्योधनो न भवेदेव ॥ ३३ ॥

राम:
११

व्यस्तसमस्तजातेरुदाहरणांतरमाह ॥ क इति । दुरीश्वरस्य दुःखेन ईश्वरः दुरीश्वरः तस्य दरिद्रस्य मोहाय अज्ञानाय कः विहित इति ए
वे प्रत्युत्तरं । ए· वित्तं । पुनः पृच्छति । गुरुः संबोधनीयः कथमित्यध्याहारः । प्रत्युत्तरं हे जीवेति वचसा । पुनः पृच्छति कलौ कलियु
गे धात्र्यां पृथिव्यां विरलः कियान् कः प्रत्युत्तरं । सन्सुधीः । सन्सुधीः कोविदो बुध इत्यमरः । धात्री च आनकी प्रोक्ता धात्री चाम
लकी मता धात्री वसुंधरा ज्ञेया धात्री स्यादुपमातरि नानार्थः नवघनः नूतनो मेघः किंवत् । किमिवेति किंवत् · वत्र
को मोहाय दुरीश्वरस्य विहितः संबोधनीयो गुरुः को धात्र्यां विरलः कलौ नवघनः किंवन्न कीदृग्द्विजः किं रेखावचनं
भवेदतिशयं दुःखाय कीदृक् खलः को विघ्नाधिपतिर्मनोभवसमो मूर्त्या भवान्कीदृशः ॥ ३४ ॥ राजीवसन्निभवदनः
द्विर्व्यस्तसमस्तजातिः ॥ × ॥ ॥ त्ययस्तुल्येर्थे प्रत्युत्तरं । इभवत् इभः कुंजरः स्तद्वत्तस्य पाम इत्यर्थः । कुंजरो वारणः करी । इभस्तंबेरमः प
द्मीत्यमरः । कीदृक् गुरुः वो द्विजो ब्राम्हणो भवति । प्रत्युत्तरं अनः अविद्युस्तस्माद्न्यो विप्रो न भवति । अन्स्वरे इति सूत्रेण नञो
ऽनादेशः । अस्माद्न्योऽनश्च इति वत् । ब्राम्हणो मामकीनः तनुरिति वचनात् । अकारो वासुदेवस्यादित्येकाक्षरकोशः । लेखावचनं किं · कार
राजी लेखा । कीदृक् खलः अतिशयं दुःखाय भवेत् । प्रत्युत्तरं वसन् निकटे वसन् विघ्नाधिपतिर्गणपतिः कः प्रत्युत्तरं इभवदनः ग

वि·मु·मं·
टी०
१२
12

जमुखः। मनोभवेन कामेन समः मूर्त्या शरीरेण भवान् कीदृशः प्रत्युत्तरं राजीवसन्निभवदनः राजीवेन कमलेन सन्निभं तुल्यं वदनं मुखं
यस्य सः॥ द्विर्व्यस्तसमस्तजातिः॥ ३४॥ द्विःसमस्तव्यस्तप्रश्नस्य लक्षणमाह यदा पूर्वं द्विःसमस्तं वारद्वयं पृष्टे पुनः व्यस्तके नरीत्या यस्य
च्छं भवेत् ननु द्विःसमस्तकव्यस्तं नाम प्रश्नं प्रश्नविद्भिः कथितं॥ ३५॥ इदानीमेतस्योदाहरणमाह। शोभनो राजा सुराजा तस्य सुराज्ञः सकलज
नः समस्तलोकः कीदृक्षो भवेदिति पृष्टे प्रत्युत्तरं विधुरविरहितः विधुरेण वियोगजदुःखेन विरहितो हीनः। विधुरं तु प्रविश्लेषवदित्यमरः॥

द्विःसमस्तं यदा पृष्टं व्यस्तके न पुनर्भवेत्   तद्द्विःसमस्तकव्यस्तं कथितं प्रश्नमण्डितैः॥ ३५॥ कीदृक्षः सकलजनो भवेत्सुराज्ञः
कः कालो विहितरहांधकारहेतुः   कः प्रेयान्कुमुदवनस्य को निहंति भ्रातृव्यं वद शिरसा जितस्त्वया कः॥ ३६॥ विधुरविरहितः
इह लोके कः कालः अंधकारस्य हेतुः कारणं विदितः प्रसिद्धः प्रत्युत्तरं तदेव विधुरविरविरहितः। विधुश्चंद्रः रविः सूर्य्यः ताभ्यां रहितः। कुमु
व्यं दवनस्य प्रेयान् कः विधुश्चंद्रः। विधुः सुधांशुः शुभ्रांशुरित्यमरः। भ्रातृवैरिणं शिरसा को निहंति वदेति पृष्टे प्रत्युत्तरं अविर्मेषः
भ्रातृव्यो भ्रातृजद्विषावित्यमरः। अविशब्दो रवौ मेषे पर्वतेऽपि निगद्यते इत्यनेकार्थध्वनिमंजरी हे राजन् त्वया कः जि
तः प्रत्युत्तरं अहितः शत्रुः द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रव इत्यमरः॥ ३६॥

रामः
१२

द्विःसमस्तप्रश्नस्य द्वितीयमुदाहरणमाह ॥ संग्राम इति । कश्चन नरः कमपि खड्गहस्तं पृच्छति स्फुरद्रूपः असिः खड्गो यस्य सः स्फुरदसिस्तेन
स्फुरदसिना त्वया संग्रामे युद्धे के हता इति पृष्टे प्रत्युत्तरं नरकरेणवः खड्गहस्तो वदति । हे नरकरेणवः हस्तिनः पुनः पृच्छति वनेति खेदे । निर
ये नरके नरस्य पीडां के कुर्युरिति पृष्टे प्रत्युत्तरं नरकरेणवः । नरकस्य नरकभूमेः रेणवः पांशवः । रेणुर्द्वयोः स्त्रियां धूलिः पांशुर्ना न द्वयोर
जः इत्यमरः । कदापि कस्मिन्नपि काले कस्मिन्नपि अंगे लोम [illegible] तनूरुहं नैव उद्भवति नैवोत्पद्यते प्रत्युत्तरं । नरकरे नरस्य मनुष्यस्य क
रे हस्ते । तनूरुहं रोम लोम इत्यमरः । जगति संसारे महालघुत्वभाजः के ख्याताः महालघोर्भावो महालघुत्वं महालघुत्वं भजंतीति महा

संग्रामे स्फुरदसिना हता त्वया के के दुःखं वत निरये नरस्य कुर्य्युः कस्मिन्नुद्भवति कदापि नैव लोम ख्याताः के
जगति महालघुत्वभाजः ॥ ३७ ॥ नरकरेणवः ॥ द्विःसमस्तकव्यस्तजातिः

लघुत्वभाजः के प्रत्युत्तरं अणवः परमाणवः । स्त्रियां मात्रा त्रुटिः पुंसि लव लेश कण अणवः इत्यमरः ॥ ३७ ॥ इति द्विःसम
स्त [illegible] व्यस्तजातिः ॥ ४८ ॥ यत्र यस्मिन्नाह्ले एकश्रुत्या एको ऽन्तरेण भिन्नार्थप्रतिपादकं वचः द्विःसमस्तस्य प्रभेदं वदन्ति तं प्र
श्नं एकालापकसंज्ञकं विदुः ॥ ३८ ॥ अस्योदाहरणद्वयं श्लोकद्वयेनाह ॥ कीदृशीति ॥ निरयभूः नरकभूमिः । अनेकप्रका

राद्रुति अनेकधा॰परमपापकर्मभिःसेव्यते। प्रस्तुतं॰नरकपालरचिता नरकाणांपालाः नरकपालारक्षकास्तैर्रचिता कृता। चपुनरर्थे
प्रेतराक्षसपिशाचैःसेवितापितृकाननस्थली प्रेतारण्य वेदिः कीदृशी प्रस्तुतं नरकपालरचिता। नराणां कपालैःरचिता कृता ॥ ४९॥
केशरोवकुलद्रुमः केशरद्रुमतलेषु संस्थितो मत्तकुंजरः कीदृशोभवति। प्रस्तुतं। दानवकुलभ्रमरहितः दानेनमदजलेनवकुल
द्रुमस्थायेभ्रमरास्तेषां हितः प्रियः। समितिसंग्रामे नत्वतः इदमित्थ ज्ञानेन लक्षरौस्त न्निरे्हैः शिवं अवेक्ष्य ज्ञात्वाऽर्जुनः कीदृ

एकश्रुत्यावचोयत्र भिन्नार्थप्रतिपादकं प्रभेदं द्विःसमस्तस्य तमेकालापकंविदुः ॥ ३८ ॥ कीदृशी निरय
भूरनेकधा सेव्यते परमपापकर्मभिः प्रेतराक्षसपिशाचसेविता कीदृशी चपितृकाननस्थली ॥ ३९
नरकपालरचिता ॥ केशरद्रुमतलेषुसंस्थितः कीदृशोभवतिमत्तकुंजरः॥ नत्वतःशिवमवेक्ष्य लक्षरौ
रर्जुनःसमितिकीदृशोभवेत् ॥ ४० ॥ दानवकुलभ्रमरहितः ॥ एकालापकजातिः ॥ ः०ः ॥

शोभवेत्। पुनः सर्वदानवकुलेदैत्यान्वये योभ्रमस्ते नरहितः ॥ ४० ॥ इत्येकालापकजातिः ॥ शिवम् ॥ ः०ः ॥

प्रभिन्नकप्रश्नस्य लक्षणमाह ॥ शब्दार्थेति । यत्प्रश्नं व्यस्तैः पदविभागैः कृत्वा प्रभिन्नं भवति । पृथक् प्रश्नं स्यात् यद्वा समस्तकैः समु-
दायप्रश्नरीत्या प्रभिन्नं स्यात् । कीदृशैर्व्यस्तैः समस्तकैः । शब्दार्थलिंगवचनैः शब्दार्थश्च लिंगं च वचनं च शब्दार्थलिंगवचनानि
तैः शब्दार्थलिंगवचनैः । कस्मिंश्चित्प्रश्ने शब्दार्थव्यस्तरीत्या प्रभिन्नं । कुत्रचित् शब्दार्थसमस्तरीत्या प्रभिन्नं । कुत्रचित्
लिंगभेदेन प्रभिन्नं । कुत्रचिद्वचनभेदेन प्रभिन्नं । कुत्रचिच्छब्दार्थलिंगाभ्यां प्रभिन्नं । कुत्रचिच्छब्दार्थलिंगवचनैः प्रभिन्नं

शब्दार्थलिंगवचनैर्व्यस्तैर्यद्वा समस्तकैः विभक्त्या च प्रभिन्नं यत्तत्प्रभिन्नकमुच्यते ॥ ४१ ॥

कुत्रचिद्विभक्तिभेदेन प्रभिन्नं यत्तत्प्रभिन्नकसंज्ञमुच्यते ॥ एवं सप्तभेदाः प्रभिन्नकप्रश्ने भवंति । शब्दार्थभेदो यथा । देव
शब्दो मेघवाची सुरवाची राजवाची च । लिंगभेदो यथा । तपः इत्यकारांतो निदाघवाची पुल्लिंगः । तपः सांतं तपस्यावा
ची नपुंसकं । वचनभेदो यथा । नर इति प्रथमैकवचनं । अकारांतस्य प्रथमा व्द्यवचनं च । ना । नरौ । नर इति । विभक्तिभे
दो यथा । मास इति रूपं प्रथमा पंचमी षष्ठी विभक्तिषु भवति ॥ ४१ ॥ ॥ शब्दार्थलिंगभिन्नस्योदाहरणद्वयं श्लोकद्वयेनाह
निर्जितेति ॥ निर्जिताः सकलाराातयः समस्तशत्रवो येन सः निर्जितसकलारातिः पृच्छति कः एको मृत्योः सकाशाद्भयं न इच्छ

तिनप्राप्नोति। प्रत्युत्तरं विधुताराते तेजः॥ हे॰ विधुताराते तेज अजः शिवः पुल्लिंगः। अजा विष्णुहरछागाः इत्यमरः॥ निशायाः रात्रेः
स्तिमिरक्षयकारि॰ अंधकारापहारि किमिति पृष्टे प्रत्युत्तरं। शब्दार्थलिंगभेदेनाह। विधुताराते तेजः विधो श्चंद्रस्य ताराणां न
क्षत्राणां तेजोज्योतिः नपुंसकं। कीदृश्याः निशायाः मेघात्ययेन मेघापगमेन कृता रुचिरा आशा दिग्यस्यां सा तस्याः ४२

निर्ज्जितसकलारातिः पृच्छति कोनैको मृत्योर्भयमृच्छति मेघात्ययेकृतरुचिराशायाः किं तिमिरक्षय
कारि निशायाः ॥४२॥ विधुताराते तेजः॥ विहगपतिः कं हतवान हि तं कीदृग्भवति पुरं जनसहितं किं
कठिनं विदितं वद धीभृद्यादःपतिरपि कीदृग्भयकृत ॥४३॥ अहिमकरमय॥ शब्दार्थलिंगभिन्नं॥

विहगेति। विहगपतिः पक्षिराजो गरुडः कं अहितं शत्रुं हतवान प्रत्युत्तरं अहिं सर्प्पं। जनसहितं पुरं नगरं कीदृग्भवति
प्रत्युत्तरं अकरं करोदंडस्तेन हीनं। हे धीभृत बुद्धिमन विदितं कठिनं किं प्रत्युत्तरं अयः लोहं नपुंसकं। यादःपतिरपि समु
द्रोपि कीदृग्भयकृत भवति वद प्रत्युत्तरं अहिमकारमयः अहयः सर्प्पाश्च मकराश्च ग्राहाश्च अहिमकरास्तैर्मयः प्र
चुरः पूर्णः। प्राचुर्यप्राधान्यार्थे मयट् पुल्लिंगार्थः। इति शब्दार्थलिंगभिन्नं॥४३॥×॥ꣳ॥ रामशिव राम शिवं

शाद्वार्थविभक्तिभिन्नस्योदाहरणद्वयमाह ॥ अनुकूलेति । अनुकूलविधायीदैवतं देवो भाग्यं वायस्य सः । नृपः कीदृशो विजयी जयशीलः । प्रत्युत्तरं कुशलवर्द्धितः । कुशलेन क्षेमेण वर्द्धितः वृद्धिं प्राप्तः । कुशलं क्षेममस्त्रियामित्यमरः । प्रथमा विभक्तिः । विरहिण्यपि जानकी सीता वने निवसंती कृतः कस्मान्मुदं प्रीतिमादध्वे । प्रत्युत्तरं कुशलवर्द्धितः कुशश्च लवश्च कुशलवौ तयोः ऋद्धिरभिवृद्धिस्तस्मात् । पंचमी विभक्तिः ४४

अनुकूलविधायिदैवतो विजयी स्यान्ननु कीदृशो नृपः विरहिण्यपि जानकी वने निवसंती मुदमा
व दधौ कुतः ॥ ४४ ॥ कुशलैर्द्धितः ॥ कुसुमं पतदेत्य नाकतो वद कस्मै स्पृहयंति भोगिनः ॥ अधि
गम्य रतं वरांगना कनुयत्नं कुरुते सुशिक्षिता ॥ ४५ ॥ सुरतरवे ॥ शाब्दार्थविभक्तिभिन्नं ॥ ० ॥ एवं

कुसुममिति । नाकतः स्वर्गात् कुसुमं पुष्पं पतत् पतमानं एत्य प्राप्य भोगिनः सुखिनः कस्मै स्पृहयंति वांछंति । भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोरित्यमरः । प्रत्युत्तरं सुरतरवे कल्पवृक्षाय । नु इति वितर्के सुशिक्षिता वरांगना चतुरा स्त्री रतं मैथुनं अधिगम्य कं प्रयत्नं कुरुते । प्रत्युत्तरं । सुरतरवे सुरतस्य मैथुनस्य रवे ध्वनौ ॥ ४५ ॥ शाब्दार्थवचनभिन्नस्योदाहरणमाह ॥ कामिति केशव नपृच्छति । हरिर्विष्णुः अंबुधिमध्यमग्नां समुद्रे निलीनां कां उज्जहार । ऊर्ध्वं नीतवान् । प्रत्युत्तरं कुं पृथ्वीं । आगमानां वेदानां कीदृक् श्रुतं श्रवणं निर्मलं पापापहं

भवति प्रत्युत्तरं दमकारं। दम इंद्रियनिग्रहस्तं करोतीति यत्तत्। वेदः श्रुतिस्तथाम्नायः स्वाध्याय छंद आगम इति हलायुधः। अ
ग्निशिखावलीढं अग्निज्वालया लेलिह्यमानं वनं काननं आमं त्रयस्वेति पृष्टे प्रत्युत्तरं दविन। दवोस्मिन्नस्तीति दवी तत्संबोधनं हे द

कामुज्जहार हरिरंबुधिमध्यमग्नां कीदृक् श्रुतं भवति निर्मलमागमानां आमंत्रयस्व वनमग्निशिखावलीढं य
तच्चापि को दहति के मदयंति भृंगान् ॥४६॥ कुंदमकरंदविंदवः ॥

विन्। चपुनः तद्वनमपि को दहति। प्रत्युत्तरं। दवः दवाग्निः। दवदावौ वनारण्यवह्नी इत्यमरः। भृंगान् के मदयंति मत्तं कुर्वंति प्रत्युत्तरं। कुंदम
करंदविन्दवः। कुंदस्य पुष्पविशेषस्य यो मकरंदः पुष्परसस्तस्य विन्दवः विप्रुषः॥४६॥॥×॥:०:॥ उदाहरणांतरमाह
वसतीति। कश्चन पृच्छति। सरोरुहाणां कमलानां संततिः कुलं कुत्र वसतीति पृष्टे प्रत्युत्तरं के जले कं शिरो जलमाख्यातं
ननु निश्चितं दिनकृतो दिवाकरस्य तिमिरच्छिदः अंधकारध्वंसकाः के भवंतीति पृष्टे प्रत्युत्तरं किरणोत्कराः किरणा
हाः। पवनभक्षाः सर्पास्तेषां सपत्नो रिपुः मयूरस्तस्य रणो युद्धे उत्सुकमुत्कंठितं पुरुषं आह्वयेति पृष्टे प्रत्युत्तरं एमः

हे केकिरणो त्कः के कीमदूरस्तस्यरणोउत्कः उत्कं ठितः शिखावलः शिखी केकी त्यमरः जगति लोके प्रियः कः इति पृष्टे । प्रत्युत्तरं ॰ राः अर्थाः । अर्थारै विभवा नरीत्यमरः । पूर्वं केकिरणोत्कारा इति प्रथमा बहुवचनमुक्तं । पश्चाद्द्वे शब्दस्यराद्वि निरू

वसति कुत्र सरोरुहसंततिर्दिनकृतो ननु केतिमिरद्विषः पवनभक्षसपत्नरणोत्सुकं पुरुषमाहूय को जगति प्रियः ॥ ४७ ॥ केकिरणोत्काराः ॥ शब्दार्थवचनभिन्नं ॥

पं प्रथमे कवचनमुक्तं शब्दार्थस्तु सर्वत्र पृथगेव । तस्मादेतत्प्रश्नं शब्दार्थवचनभिन्नसंज्ञकं ॥ ४७ ॥ ॥ ० ॥
शब्दार्थविभक्तिभिन्नलिंगस्योदाहरणमाह ॥ कीदृगिति । यमस्येदं याम्यं याम्यं च तद्गृहं च याम्यगृहं याम्यगृहं गतस्य पुंसः गृहं कीदृगिति पृष्टे प्रत्युत्तरं । हारावि । हायुक्तः विषादेन शोकेन पीडया च युक्तो रावः शब्दो यत्र तत् हा वियाद्भुगार्त्ति विश्चित्यमरः । अंभसां जलानां तरणे परपारगमने काः त्राणं शरणं प्रत्युत्तरं । नावः नौका । नु इति प्र

स्तोहे। वसुनरर्थे। कंठ। हेगल। नेतवभूषास्यलंकियाकथंन। मुक्ताकलापैर्मुक्ताहारैरिति अमुनाप्रकारेण पृष्टे कंठः प्रत्युत्तरं वदति। हाराविनावः। हेहाराः वो विनायुष्मान्विना कंठस्यालंकृया नास्ति। नावइतिस्त्री

कीदृग्गृहं याम्यगृहं गतस्य कास्त्राणामंभस्तरणोजनानां ॥ भूषाननेकंठकथंनु पृष्टेमुक्ताकलापैरिति चोत्तरं किं ॥४८॥ हाराविनावः ॥

लिंगः ॥ प्रथमाबहुवचनं च। वइति युष्मद्धदस्य द्वितीयाबहुवचनादेशश्च। शब्दार्थविभक्तिभेदो लिंगभेदश्चोक्तः ॥४८॥ ॥×॥ ॥ शब्दार्थविभक्तिलिंगप्रश्नस्योदाहरणांतरमाह ॥ कवयइति के वयः पंडिताः कुत्रकस्मिन्विषये। कीदृशाभवंति वदेति पृष्टे प्रत्युत्तरं। गिरिसारमुखाः। गिरिवाराणांसारं रहस्यं मुखंति अपहरंतीतिगिरिसारमुखाः। मुयस्तेयेसमंततः परितः विदितं प्रसिद्धं कठिनं किं प्रत्युत्तरं गिरिसारं। लोहं। लोहोस्त्रीशस्त्रकं तीक्ष्णं।

पिंडं कालायसायसी। अस्मसारइत्यमरः। पुनः पृच्छति। अधुनातव वैरियोषितां शत्रुस्त्रीणां हृदये काः विहायता यःप्रवल इति पृष्टे प्रत्युत्तरं। उषाः रात्रिः तदंतंवा। उषाऽरात्रेरवसान इत्यमरः। उषारात्रौ तदंते स्यादन्यत्रा मयम

कवयो वद कुत्र कीदृशाः कठिनं किं विदितं समं ननः अधुना तव वैरियोषितां हृदि तापः प्रवलो विहायकाः ॥४८॥ गिरिसार मुरवाः॥ इतिशब्दार्थविभक्ति लिंगभिन्नं॥

पुषेति विश्वः। सारसुषा इति पुल्लिंगे प्रथमाविभक्तिः उषा इति स्त्रीलिंगे द्वितीयाविभक्तिश्च ॥४८॥ इति शब्दार्थ विभक्ति लिंगभिन्नं॥ शब्दार्थवचन लिंगभिन्नस्योदाहरणद्वयं श्लोकद्वयेनाह॥ मेघात्यय इति॥ मेघात्यये शरत्काले सुभगावगाहं शोभनं मज्जनयोग्यं किंभव[illegible]ति प्रत्युत्तरं सरः। सरसी सर इत्यमरः। चार राश्च मल्लाश्च वेश्याश्च चारणमल्लवेश्याः स्ताः वेत्यवधारणे। काविडंवयति॥ प्रत्युत्तरं जरा। वार्द्धक्यं। दुर्वारवीर्य्यविभव

कासारः२

वि॰ मु॰ मं॰ टी॰ १७

17

स्यभूपस्य रणे कः भवेत् । प्रत्युत्तरं जयः ॥ तरणिप्रभाभिः सूर्यकिरणैः स्मेरवक्त्रेण सस्मितमुखेन सुभगाः शोभनाः काः प्रत्यु
त्तरं सरोजराजयः कमलानां लेखाः ॥ ५० ॥ शिरोरुहः केशाः मधुमथनं केशवं पृच्छति । च पुनः मधुमथनः केशवस्तं शिरोरु

मेघात्यये [illegible] भवति किं सुभगावगाहं का वा विडंबयति चारणमल्ल वेश्या ॥ दुर्वारवीर्यविभवस्य भवे
द्रणे कः कास्मेरवक्त्रसुभगास्तरणिप्रभाभिः ॥ ५० ॥ सरोजराजयः ॥ पृच्छति शिरोरुहो मधुमथनं म
धुमथनस्तं शिरो च कः खलु चपलतया भुवि विदितः का ननु यानतया गविगदिता ॥ ५१ ॥ केशवनो
का ॥ शब्दार्थवचनलिंगभिन्नं ॥ ० ॥

रुहं

हं पृच्छति किं पृच्छतीत्याह । भुवि भूतले चपलस्य भावश्चापलता तया चपलतया कः विदितः । एवं शिरोरुहेण पृष्टो
मधुमथनो वदति हे केशवनोकाः । वने ओकास्थानं यस्य सः वानर इत्यर्थः । ननु इति प्रश्ने गविजले मातृवायुज
लेषु गौरिति नानार्थः यानतया यानस्य भावो यानता तया यानतया का गदिता उक्ता मधुमथनेन पृष्टः शिरोरुहो
वदति हे केशवनोका नावः । शब्दार्थवचनलिंगभिन्नं ॥ ५१ ॥ श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः

रामः
१७

शब्दार्थयोश्च नविभक्तिभिन्नस्याद्युमुदाहरणं यथा नेतिकश्चन पृच्छतिकीदृशीभूः भूमिः मलयस्य गिरेर्नभवति। प्रत्यु॰ विपन्नगा। विगताः पन्नगाः सर्पाः यस्यां सा सर्परहिता मलया चलभूमिः नभवत्येव। इह लोके कः कुचं स्तनं नबिभर्ति नधरति। प्रत्युत्तरं। नाऽपुमान्। पुनः पृच्छति श्रीलक्ष्मीः कंगता॰ कमाश्रिता प्रत्युत्तरं। अं विष्णुं। अकारो वासुदेवस्यादित्येकाक्षरकोषः। भवदरिनिवहेषु भवतां शत्रुवर्गेषु

नभवतिमलयस्यकीदृशीभूः कइहकुचंनबिभर्ति कंगताश्रीः भवदरिनिवहेषुकास्तिनित्यंवल मथनेनविपद्यधायिकेषां ॥५२॥ विपन्नगानां॥

नित्यं कास्ति। प्रत्युत्तरं विपत्। आपत्। बलमसुरं मथ्नातीति बलमथनः शक्रस्तेन केषां विपद्यधायि कृता। प्रत्युत्तरं। नगानां शैलानां। नगशैलौ नगाः वगा बित्यमरः। बलाराति शचीपतिः॥ ५२॥ ॥ ॥ अस्यैवोदाहरणांतरमाह॥ समयमिति। इह लोके कं॰ समयं कं कालं॰ निशीथं नक्तं वदंति विद्वांस इति शेषः। प्रत्युत्तरं। अरविं नविद्यते रविर्यस्मिन् स अरविस्तं। नक्तं निशीथोरजनी रात्रिर्दोषा विभावरीति ताराभिधानः। वारिवाहवृंदं। मेघसमूहः कान्शामयति निर्वापयति प्रत्युत्तरं दवान्। वनाग्नीन्। सदानिरंतरं त्रयं दृष्टिगोचरस्तऽगः कीदृशः। जगतां मनस्तु लोकानां चित्तेषु मात्रांपरिमाणविशेषं अतिक्रम्य वर्त्तत इत्यतिमात्रं मुदं हर्षं वितरति

वि·मु·मं·
टी· मा
१८
18

प्रयच्छति। प्रत्युत्तरं। अरविंदवान्। कमलोपशोभितः। दवानिति द्वितीया विभक्तिस्तत्र बहुवचनं च अरविंदवानिति प्रथमा विभक्तेरेकवचनं। एतेन शब्दार्थवचनविभक्तिभिन्नसंज्ञं प्रहेलमेतत्॥५३॥ शब्दार्थवचनविभक्तिभिन्नं॥

समयमिह वदंति कं निशीथं शमयति कान्वद वारिवाहवृंदं वितरति जगतां मनस्सु कीदृङ्मुदमतिमात्रमयं सदा तडागः॥५३॥ अरविंदवान्॥ शब्दार्थवचनविभक्तिभिन्नं॥

शब्दार्थलिंगवचनभिन्नस्योदाहरणं यथा॥ कीदृक्षमिति। समितिसंग्रामे कीदृक्षं वलं सैन्यं·शत्रुं निहंति घातयति। वरूथिनी वलं सैन्यमित्यमरः। प्रत्युत्तरं अभि। न विद्यते भीर्भयं यत्र तत्। भयरहितमित्यर्थः। सदा विष्णोर्मनसि हरेश्चित्ते कामुदं तनोति प्रीतिं विस्तारयति। प्रत्युत्तरं·मा·लक्ष्मी। तुच्छं सत्त रिक्तं सत्त शरधिमुखं तूरणीकोशं किं निगद्य

एमः
१८

तेकिमुच्यते प्रत्युत्तरं· अनिशु नविद्यंतेदृष्यवो वाणा यस्मिंस्तत्। तूणो पासंग तूणीर निषंगाइषुधिर्द्वयो स्तूणएषा मित्यमरः। अपमानएवअवज्ञैव पंचत्वैः समं मरणतुल्यं केषु प्रत्युत्तरं। अभिमानिषु अभिमानयुक्तेषु। पंचत्वं मरणं

कीदृक्षंसमितिवलंनिहंतिशत्रुं विष्णोः कामनसिमुदंसदा तनोति ॥ तुच्छंस च्छरधिमुखंनिगद्य तेकिंपंचत्वैःसममपमानएवकेषु ॥५४॥ अभिमानिषु ॥

मृत्युः कालक्षमं इति नाराभिधानः ॥५४॥ ॥ः॥ उदाहरणांतरमाह ॥ घनेति। घनसमये प्रावृट्काले कीदृक्षुशिखिषु मयूरेषु नृत्यं नटनंस्यात् प्रत्युत्तरं समुत्सुसहर्षेषु। घनात्मेघात् किंपतति। प्रत्युत्तरं· कं·जलं· प्रावृड्विवर्षाकालेग मनंगतिः कस्य नस्यात् प्रत्युत्तरं अनसः शाकटस्य। क्लीवेऽनः शाकटोस्त्री स्यादित्यमरः। मानसंदेवसरस्तंप्रतिगमनं मानसगमनं तस्मैमानसगमनाय हंसाः राजहंसाः कीदृशाभवंति। इति पृष्टे प्रत्युत्तरं· समुत्सुकमनसः उत्कंठित

वि·मु·मं·
टी·
१९
19

चेतसः। अनसइति नपुंसकलिंगमथ्थैकवचनंच। समुत्सुकमनसइतिपुल्लिंगेबहु[illegible]वचनंच ॥ ५५॥
समुत्सुकमनसः शब्दार्थलिंगवचनभिन्नं ॥ छं:॥ श्री:

घनसमये शिखिषु त्वामन्नृत्यं कीदृक्षु किं घनात्यतति प्रावृषिकस्य नगमनं मानसगमनाय कीदृशा हंसाः ॥ ५५॥ समुत्सुकमनसः ॥ शब्दार्थलिंगवचनभिन्नं ॥

प्रकारांतरमाह। अर्थेति केचन सुकुमारधियः अल्पबुद्धयः। अर्थमात्रस्यैव एको भेदो यस्मिन्सः तेनभिन्नं वध्नंति। तन्मुख्यं विदग्धैरादृतं। चकारात्तत्यथा दर्शयति ॥ ५६॥ आनंदयतीति। भूतलेपृथिव्यां सज्जनानेव अन्यर्थकः आनंदयति। प्रत्युत्तरं। मित्रोदयः। मित्राणामुदयः। पद्मानिकः प्रबोध

एमः
१९

यति। चपुनः तमांसि अंधकाराः रिपुकः निहंति। प्रत्युत्तरं मित्रोदयः। मित्रस्य सूर्यस्योदयः। सुभरिपुस्तरणिर्मित्र इत्यम
रः॥५७॥ अटवीति। कस्थिनपृच्छति। कीदृशी अटवी वनस्थली दुर्गमा भवति प्रत्युत्तरं मदनवती। म[illegible]द नोधत्तू

अर्थे मात्रैकभेदेन भिन्नं वध्नंति केचन सुकुमारधियस्तत्र विदग्धैरादृतं यथा ॥५६॥ आनंदय
ति को त्यर्थं सज्जनानेवभूतले प्रवोधयति पद्मानि तमांसि च निहंति कः॥ ५७॥ मित्रोदयः॥
अटवी कीदृशी प्रायो दुर्गमा भवति प्रिये प्रियस्य कीदृशी कांता तनोति सुरतोत्सवं॥ ५८॥ मदनवती॥

रस्तेन युक्ता। मातुलो मदनश्चैव धत्तूरः कनकाह्वय इति ताराभिधानः। कीदृशी कांता प्रियस्य सुरतोत्सवं तनोति
प्रत्युत्तरं। मदनवती। कामिनीत्यर्थः॥५८॥॥ भिन्नावित। तस्मात्प्रह्ल कृशलैर वश्यं शब्दार्थौ भिन्नौ

कर्तव्यौ। लिंगादिषु लिंगविभक्तिवचनेषु यथाशक्ति॰यथामति॰विपश्चितः पंडिताः भेदमाहुर्वदंति॥
॥५८॥ ताराचंद्रकृतायामस्यां विदग्धमनोहराख्यायां॥ टीकायांसरहस्यः पूर्णः प्रथमः परिछेदः॥१॥

भिन्नावश्यंकर्तव्यौ शब्दार्थौ प्रश्नकोविदैः लिंगादिषु यथाशक्ति भेदमाहुर्विपश्चितः॥५८
इतिधर्मदासकृते विदग्धमुखमंडने प्रथमः परिछेदः १॥ विशेषणं विशेष्यं च यत्र प्रश्ने वि
धीयते भेद्यभेदकमाहुस्तं प्रश्नं प्रश्नविदो जनाः॥१॥

पूर्वपरिछेदे व्यस्तावभिन्नकांतानां प्रश्नानामुदाहरणान्युक्तानि। इदानीं भेद्यभेदकजातेर्लक्षणमुच्यते॥०॥
विशेषणमिति। यस्मिन्प्रश्ने एकवाक्ये विशेषणं विशेष्यं च विधीयते। क्रीयते कविना॥ तं प्रश्नं विदः भेद्यभेद
कसंज्ञकं आहुः। प्रोचुः तत्र इमं यथाप्रदर्शयतीत्यर्थः॥१॥ श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः

भेद्यभेदकजातेरुदाहरणं द्वाभ्यामाह ॥ कीदृगिति । स्वेच्छाविहारिणां मत्स्यानां कीदृक् किं हितं तस्यादिति पृष्टे । प्र
त्युत्तरं । विमत्सरः विमत् विः पक्षी तद्युक्तं सरः तडागं । विमदिति विशेषणं । सर इति विशेष्यं । परेषां गुणेरन्येषां सच्चरितैः की
दृशः पुमान् अत्यर्थं मोदते हर्षितो भवति । प्रत्युत्तरं । विमत्सरः अन्यशुभद्वेषरहितः । मत्सरोऽन्यशुभद्वेष इत्यमरः ॥ २ ॥ अगस्त्ये

कीदृक्किं स्यात्तमत्स्यानां हितं स्वेच्छाविहारिणां ॥ गुणैः परेषामत्यर्थं मोदते कीदृशः पुमान् ॥ २ ॥ विमत्सरः ॥ अग
स्त्येन पयोराशेः कियत् किं पीतमुज्झितं ॥ त्वया वैरिकुलं वीर समरे कीदृशं कृतं ॥ ३ ॥ सकलंकं ॥ भेद्यभेदकजातिः

ति ॥ अगस्त्येन मुनिना पयोराशेः समुद्रात् कियत् किं पीतं कियत् किं उज्झितमिति पृष्टे । प्रत्युत्तरं । सकलं कं । सकलं समस्तं कं
जलं । सर्वं जलं पीतं । सर्वं जलमुज्झितमित्यर्थः अत्र सकलमिति विशेषणं । कमिति विशेष्यं । हे वीर । त्वया समरे युद्धे वैरिकुलं
शत्रुसंतानं कीदृशं कृतं । प्रत्युत्तरं । सकलंकं । कलंकेन सहितमित्यर्थः ॥ ३ ॥ भेद्यभेदकजातिः ॥ ओजस्विजातेर्लक्षणमा
ह ॥ दीर्घेति ॥ यत्र दीर्घवृत्तेन पृष्टं सत् उत्तरं कियदक्षरेणाल्पाक्षरेण भवति तदोजस्वीति विख्यातं । केचन तन्मूर्जित
संज्ञमाहुः ॥ ४ ॥

एतदुदाहरणं यथा। कामिन्यादृति। कामिन्याः कीदृक् कुमान् वल्लभः। प्रत्युत्तरं। समरतः। समं तुल्यं रतं मैथुनं यस्य सः। कीदृश्याः कामि
न्याः स्तनयोर्भरेण मंथरा गतिर्यस्याः। पुनः लीलया चलती चक्षुषी यस्याः पुनः कंदर्पैक विलासस्य नित्या वसतिः स्थानं या। तस्याः। वस
तीरात्रिवेश्मनोरित्यमरः। ते अरयः शत्रवः जीवनकामाः कुतो निर्यांति। अपसरंति। प्रत्युत्तरं। समरतः। समरः संग्रामस्तस्मात्। कीदृ

दीर्घदृष्टेनेनयत्पृष्टं सुत्तरं कियदक्षरं ॥ तदोजस्वीति विख्यातमूर्जितं चेतिकेचन ॥४॥ कामिन्याः
स्तनभारमंथरगते र्लीलाचलच्चक्षुषः कंदर्पैकविलासनित्यवसतेः कीदृक् पुमान्वल्लभः ॥
हेलाकृष्टकृपाणपाटितगजानीकात् कुतस्तेरय स्त्रासायासविशुष्क कंठकुहरा निर्यांति जीवार्थिनः
॥५॥ समरतः॥

शात् हेलया आकृष्टेन कृपाणेन पाटितानि गजानीकानि गजानामनीकानि सैन्यानि यस्मिन्सः। तथा तस्मात्। कीदृ
शा अरयः त्रासायासेन विशुष्कानि कंठकुहराणि येषां ते। कुहरं सुषिरं विवरं बिलमित्यमरः ॥५॥

उदाहरणांतरमाह ॥ दैत्येति । असौ जगद्व्यापको दैत्यारिर्विष्णुः वराहवपुषा वाराहावतारेण · अंबुधेः सकाशात् कांउज्जहार उद्धृतवानिति पृष्टे । प्रत्युत्तरं । कुं । पृथ्वीं । रूपं चक्षुर्ग्राह्यं काविनिहंति । प्रत्युत्तरं । जरा । वार्द्धकं । मधुनाम्नो दैत्यस्य वधूर्जाया · तस्याः वैधव्यदा नदीक्षायां गुरुराचार्यः कः प्रत्युत्तरं अः विष्णुः । स्वछंदं निरवग्रहं यथास्यात्तथा । नवसल्लकीकवलनैः । नवा चासौ सल्लकीवनवसल्लकी गजभक्षा · तस्याः कवलनान्यास्वादनानि तैः । पंपासरोमज्जनैः कृत्वा । विंध्याद्रेः वने के वसंति । प्रत्युत्तरं । कुं

दैत्यारातिरसौ वराहवपुषा कामुज्जहारांबुधेः कारूपं विनिहंति को मधुवधूवैधव्यदीक्षागुरुः ॥ स्वछंदं नवसल्लकीकवलनैः पंपासरोमज्जनैः के विंध्याद्रिवने वसंत्यभिमतक्रीडाभिरामस्थिताः ॥ ६ ॥ कुंजराः

॥ ओजस्विजातिः ॥

जराः गजाः । कीदृशाः । अभिमतक्रीडाभिरामेस्थिताः अभिमता चासौ क्रीडा च अभिमतक्रीडयाभिरामं अभिमतक्रीडाभिरामं तत्र तिष्ठंतीति ते ॥ ६ ॥ ओजस्विजातिः ॥ ॐ ॥

 न

सालंकारजातेर्लक्षणमाह ॥ उपमेति। उपमीयते अनया इत्युपमा। उपमा आदिर्यस्य स उपमादिरलंक्रियते अनेनेत्यलंकारः। बहु-
प्रकार इति बहुधा परिकीर्तित उक्तः। यत्त्वमस्मं तेन उपमाद्यलंकारेण सार्द्धं कथ्यते सालंकारसंज्ञकं तदुच्यते ॥७॥ अस्योदाहरणं
यथा॥ कल्याणेति॥ कश्चित्पृच्छति। अत्र लोके यथा त्वं कल्याणवाग्भवसि तथा त्वमिव किं पदं कांतं। प्रत्युत्तरं। शं।
शिवं। कल्याणमित्यर्थः॥ सद्रूपते स्त्वमिव परितोषकारी कः। करः। भागधेयः। भागधेयः करो बलिरित्यमरः।

उपमादिरलंकारो बहुधा परिकीर्तितः॥ यस्तेन कथ्यते सार्द्धं सालंकारं तदुच्यते ॥७॥ कल्या
णवाक् त्वमिव किं पदमत्र कांतं सद्रूपते स्त्वमिव कः परितोषकारी॥ कः सर्वदा वृषगतिस्त्व
मिवातिमात्रं भूत्याश्रितः कथय पालितसर्वभूतः॥८॥ शंकरः॥

सर्वदा अतिमात्रं अपरिमितं भूत्याश्रिता ऐश्वर्यवान्। वृषगतिः सुकृती पालितसर्वभूतः पालितप्रजा लोकस्त्वमिव कः। प्रत्यु
त्तरं। शंकरः। शिवः। कीदृशः। अत्यंतं विभूतिभूषितः वृषभगामी। पालिताः सर्वे भूतप्रेतादयो येन सः। विभूतिर्भूतिरैश्वर्यमि
त्यमरः। सुकृते वृषभे वृषइति नानार्थः। इवेति सादृश्यार्थे॥८॥

उदाहरणांतरमाह सूर्यस्येतिसूर्यस्यविवस्वतस्तिमिराण्येवकुंजरास्तिमिरकुंजरास्तेषांवृंदसंघस्तिमिरकुं
जरवृंदं·तस्यसिंही·अपहंत्री·तिमिरकुंजरवृंदसिंही·का·प्रत्युत्तरं भा·दीप्तिः भाभाश्छविर्द्युतिर्दीप्तय
इत्यमरः सत्यस्यऋतस्य सुकृतस्यपुण्यस्यवारिःसमुद्रःसुकृतवारिधिस्तस्यचंद्रलेखाका·प्रत्युत्तरं
गी ४ गीः वाणीर्वाग्वाणीत्यमरः चपुनःपृथायाःकुंत्याःसुतःपार्थःअर्जुनः अरिदावहुतानः अरीणांश श ४
सूर्यस्यकातिमिरकुंजरवृंदसिंहीसत्यस्यकासुकृतवारिधिचंद्रलेखा पार्थश्चकीदृगरिदाव
हुताशनोभूत्कामालतीकुसुमदामहरस्यमूर्ध्नि ८ भागीरथी॥सालंकारजातिः
शत्रूणांदावहुताशनोदावानलःकीदृगभूदितिए
वं·प्रत्युत्तरं·रथीरथोस्यास्तीतिरथीरथयुक्तइत्यर्थः शतांगस्यंदनोरथइत्यमरःहरस्यशिवस्यमूर्ध्निमस्तके
मालतीकुसुमदाम·जातीकुसुममाला·का·प्रत्युत्तरं·भागीरथी त्रिपथगा सुमनामालतीजातीत्यमरः ६ सालंका

वि·मु·टी· सकौतुकजातेर्लक्षणमाह लघ्विति यल्लघुवृत्तेनएव स्वल्प· प्रभूताक्षरेणप्रचुराक्षरेणोत्तरं तत्सकौतुकसंज्ञकमि
२३ ति तदिदं सकौतुकं यथा प्रदर्शयति १० क इति कश्चन पृच्छति स्थिराः के· प्रत्युत्तरं· अगाः शैलाः स्त्रीणां प्रियाः
23 के· प्रत्युत्तरं धवाः पतयः अप्रियः कः प्रत्युत्तरं रिपुः शत्रुः नक्तं निशीथं आह्वयं· प्रत्युत्तरं रजनि नक्तं च रजनी
वित्यमरः रम्यान्नृत्यभूः मनोज्ञा नृत्यभूमिः कीदृशी प्रत्युत्तरं ततरंगा ततेन वीणादिचतुर्विधवाद्येन युक्तो

लघुवृत्तेन यत्स्वल्पं प्रभूताक्षरमुत्तरं सकौतुकमितीष्टं तितद्विदस्तदिदं यथा १० के स्थिराः के

प्रियाः स्त्रीणां कोऽप्रियो नक्तमाह्वयः नृत्यभूः कीदृशी रम्या नदी कीदृग्घनागमे ११ अगाधवारिपूर
जनिततरंगा

रंगो नृत्यस्थानं यस्याः सा ततं वीणादिकं वाद्यमित्यमरः रंगस्यान्नर्तनस्थानमिति हलायुधः घनागमे वर्षा
काले नदी कीदृक्· प्रत्युत्तरं अगाधवारिपूरजनिततरंगा अगाधश्चासौ वारिपूरश्च अगाधवारिपूरस्तेन २३
जनिता उत्पादितास्तरंगा· ऊर्मयो यस्यां सा अगाधमतलस्पर्शे भंगस्तरंग ऊर्मिर्वेत्यमरः ११

उदाहरणांतरमाह केति विष्णुनाजगद्व्यापकेन॰ का कृता प्रश्न॰ कुमुदः कौथिव्यां मुत् हर्षः मुत्प्रीतिः प्रमदोहर्ष
इत्यमरः योषितास्त्रीणांकीदृक् कः प्रशस्यते प्रश्न॰ अवनवान्॰ धवः अवनं रक्षणं तद्युक्तः धवः पतिः असे
व्यः सेवाकर्तुमनर्हः स्वामीप्रभुः कीदृशः प्रश्न॰ अदयः दयारहितः निशातमः रात्रेस्तिमिरं कोनिहंति
प्रश्न॰ कुमुदवनबान्धवोदयः कुमुदानांवनंकुमुदवनं कुमुदवनस्यबांधवश्चंद्रस्तस्योदयः ५

काकृताविष्णुनाकीदृग्योषितांकःप्रशस्यते असेव्यःकीदृशःस्वामीकोनिहंतिनिशातमः १२
कुमुदवनबान्धवोदयः सकौतुक जातिः प्रश्नवर्णश्रुतेस्तुल्यंयत्रस्यादुत्तरंवरं प्रश्नोत्तर
समंतद्वास्तदाहुःश्रूयतांयथा १३

दुः कमुदबांधवइत्यमरः सकौतुकजातिः प्रश्नोत्तरसमजातेर्ल
क्षणमाह प्रश्नेति यत्रप्रश्ने प्रश्नवर्णश्रवणस्यतुल्यमुत्तरं॰ वरं॰ निःसंदिग्धं स्यात्तत्प्रश्नोत्तरसंज्ञमाहुः स्त
ज्ज्ञाः तज्ज्ञानंतीतितज्ज्ञाः श्रूयतांभवद्भिरितिशेषः यथातदर्शयति १३

अस्योदाहरणं यथा कमिति मदनजनकं मदोत्पादकं · कं दर्पकं गर्वं प्राहुरिति एवं हे इदमेवोत्तरं कंदर्पं · म
दनं दर्पो मदो वलेपो मानो गर्वो भवेदहंकार इति हलायुधः च पुनरर्थे इह लोके काचघटीकलशी अद्भु
तमा · अतिशयेन स्वच्छा · निर्मलेत्यर्थः प्रत्युत्तरं तदेव · काचघटी ॥ काचस्य मणेर्घटी मध्यदेशे सी सीति
ख्यातिः इत्यादि प्रश्ने यत्प्रयुक्तं उचितमुत्तरं तच्छिविंसविचार्य आशु शीघ्रं ब्रूत १४ पथीति पथिमार्गे ।

कंदर्पं मदजनकं प्राहुः काचघटी गदिताद्भुतमेह इत्यादिप्रश्ने प्रयुक्तं यद्ब्रूत तदुत्तरमाशु विचिं
त्य १४ पथिकस्तिष्ठति कष्टं विरही नाविकः प्रास्ते तत्कृतरक्षः इत्यादि प्रश्ने प्रयुक्तं यद्ब्रूहि
तदुत्तरमुत्तमपूरुष १५ इति प्रश्नोत्तरसमजातिः

कोविरही · आदिविप्रयुक्तः कष्टं तिष्ठति दुःख
मनुभवति प्रश्नाक्षरमेवोत्तरं पथिकः अध्वगः नावि नौकायां कः आस्ते कैतिष्ठति · प्रत्युत्तरं · ना
विकः कर्णधारः कीदृशः तत्कृतरक्षः तस्याः नौकायाः कृता रक्षा येन सः कर्णधारस्तु नाविक इत्यम
रः उत्तमपुरुषेति संबुद्धिः अन्यत्स्पष्टं १५ प्रश्नोत्तरसमजातिः

पृष्टप्रश्नजातेर्लक्षणमाह यस्मिन्निति यस्मिन्प्रश्नेउत्तरमुच्चार्यते तस्यैवोत्तरस्यप्रश्नः पृच्छ्यते॰ तत्पृष्टप्रश्नसंज्ञं द्वंद्वं
इतिप्रश्नोत्तरविज्ञाः यथाद्दर्शयति १६ लक्ष्मणेतिं यत्रप्रश्नेलक्ष्मणेत्युत्तरं भवति॰ तत्रप्रश्नः कीदृशः स्यादि
तिपृष्टे॰ प्रत्युत्तरं॰ कासारसहिता सारसस्यपक्षिविशेषस्याहिताप्रियाकाभवतीत्येवं पृष्टे लक्ष्मणेत्युत्तरं सिध्यति

यस्मिन्नुत्तरमुच्चार्यप्रश्नस्तस्यैवपृच्छ्यते पृष्टप्रश्नं तादिद्वंद्वंतिप्रश्नोत्तरविदोयथा १६ लक्ष्मणेत्यु
त्तरं यत्रप्रश्नः स्यात्तत्रकीदृशः ग्रीष्मेद्विरदवंशायवनालीकीदृशीहिता १७ कासारसहिता

सारसस्यतुलक्ष्मणेत्यमरः ग्रीष्मेनिदाघकालेद्विरदवंशायगजयूथायवनालीवनश्रेणी॰ कीदृ
शीहिता॰ सुखदा प्रत्युत्तरं कासारसहिता कासारेण॰ सरसा॰ सहिता कासारः सरसीसरः वीथ्या
लि
वलिः पंक्तिः श्रेणीत्यमरः १७

एष्टप्रश्नस्योदाहरणांतरमाह चाद्यइति यत्रप्रश्ने चाद्यइत्युत्तरंस्यात्तत्र प्रश्नः कीदृशोभवति केनिपाताः
निपातसंज्ञकाः केभवंति एवं एष्टे· चाद्योनिपाताइत्युत्तरंसिद्धं पुनः एच्छति नौकायास्तरणेवाहनोपा
याः पारावारगमनसाधनानिकेस्युरितित्वरितंशीघ्रंकथयेति एष्टे· प्रत्युत्तरं· केनिपाताः अरित्राणि अ
रित्रंकेनिपातकइत्यमरः मध्यदेशेडांडेतिख्याति १८ इतिएष्टप्रश्नजातिः भग्नोत्तरजातेर्लक्षणमा

चाद्यइतियत्रस्यादुत्तरमथतत्रकीदृशः प्रश्नः कथयत्वरितंकेस्युर्नौकायावाहनोपायाः १८
केनिपाताः एष्टप्रश्नजातिः कथयामुकमित्यादिभिंर्व्यो यत्रोत्तरंभवेत् भग्नोत्तरंतदिच्छंतिका
कुमात्रेणगोपितं १९
ह कथयेति यत्रप्रश्नेऽमुकंकथयेत्यादिपदंभंर्व्योत्तरंभवेत् तत्भग्नोत्तर
संज्ञमिच्छंति कीदृशंतत् काकुमात्रेणगोपितं शोकभयादिजनितध्वनिविकारेणगोपितंअप्रकटं· २५
काकुस्त्रियांविकारोयः शोकभीत्यादिभिर्ध्वनेरित्यमरः १९

भग्नोत्तरजातेरुदाहरणद्वयं श्लोकद्वयेनाह भवतइति भवतइव यथाभवतस्तथाकस्य अभ्यंतरमं
तःकरणं· स्वच्छं निर्मलं अगाधं गंभीरं अतिशिशिरं अतिशीतलमितिएषे· प्रत्युत्तरं सरसः कासारस्य
शिशिरोजडस्तुषारः शीतलः शीतइत्यमरः सदात्वमिव· काव्यामृतरसेषुमग्नोलीनः कः कथय·
प्रत्युत्तरं· सरसः रसैःशृंगारादिभिरष्टभिःसहितः २० सरुषिवीरेसक्रोधे·सुभटेसतिनियतंनिश्चि

भवतइवातिस्वच्छंकस्याभ्यंतरमगाधमतिशिशिरं काव्यामृतरसमग्नस्त्वमिवसदाकः कथ
यसरसः २० वीरेसरुषिरिपूणांनियतंकाहृदयशायिनीभवति नभसिप्रोज्झितजलदेका
राजतिदेववद्तारा २१ भग्नोत्तरजातिः

तंरिपूणांहृदयशायिनीका·भवति तारा इत्यत्र· तकारसंत्री· प्रत्युत्तरं ददाति आरा·चर्मभेदिका।
स्यादारा चर्मभेदिकेत्यमरः प्रोज्झितजलदे नभसि· मेघरहिते आकाशेका·राजति·शोभते हेदेव·
वद· प्रत्युत्तरं तारा·नक्षत्रं नक्षत्रमृक्षंभंतारेत्यमरः २१ भग्नोत्तरजातिः

यदिति प्रश्नवाक्ये· प्रश्नश्लोके· आदिमध्यांतसंस्थितं यत्पदं स्यात्· तत् उत्तरं त्रिधा आदिमध्यांतसं-
ज्ञितमिति आद्युत्तरसंज्ञं मध्योत्तरसंज्ञं अंतोत्तरसंज्ञं वेत्यर्थः तिङ्·सुबंतचयो वाक्यं क्रिया वा कारकान्वि-
तेत्यमरः २२ तत्राद्युत्तरजातेराद्यमुदाहरणमाह भ्रमेति तरामतिशयेन विकसितः प्रफुल्लः पद्मः भ्रमरा-
णां हितः प्रियः कीदृक्षो भवति प्रत्युत्तरं श्लोकाद्यावाह भ्रमरहितः भ्रमः कंपस्तेन हीनः वा पुंसि पद्मं नलि-

यत्पदं प्रश्नवाक्ये स्यादादिमध्यांतसंस्थितं उत्तरं तत्त्रिधा प्रोक्तमादिमध्यांतसंज्ञितं २२ भ्रमरहि-
ति तः कीदृक्षो भवति तरां विकासितः पद्मः ज्योतिषिकः कीदृक्ष· प्रायो भुवि पूज्यते लोकैः २३

नमित्यमरः भुवि भूमौ प्रायो बाहुल्येन· ज्योतिषि· ज्योतिःशास्त्रे लोकैर्मनुष्यैः कः पुरुषः कीदृक्षः कथं पूज्य-
ते प्रत्युत्तरं तदेव भ्रमरहितः अयं भ्रांत्या रहित इति भ्रांतिर्मिथ्यामतिर्भ्रम इत्यमरः २३

चि

आद्युत्तरजातेरुदाहरणांतरमाह प्रभवइति कः नगपतिः शैलराजः गंगाया भागीरथ्याः प्रभवः
आद्योपलब्धिस्थानं प्रत्युत्तरं प्रभवः नगपतिरितिविशेषणादेवप्रभवो हिमालयः यथा वाल्मी
किः संस्कृतप्रभवः तथा हिमवान्गंगाप्रभवइत्यमरः स्याज्जन्महेतुः प्रभवः स्थानं वाद्योपलब्धय

प्रभवः को गंगाया नगपतिरतिसुभगशृंगधरः के सेव्यंते सेवकसार्थैरत्यर्थमर्थरतैः २५

आद्युत्तरजातिः

इत्यमरः कीदृशो नगपतिः अतिसुभगानि शृंगाणि धरतीति अतिसुभगानि शृंगाणि धरतीति अ
तिसुभगशृंगधरः पुनः पृच्छति अत्यर्थं बाहुल्येन अर्थरतैः द्रव्यपरैः सेवकसार्थैः भृत्यसंघातैः के
सेव्यंते इति एष प्रत्युत्तरं भवः स्वामिनः २५ आद्युत्तरजातिः

मध्योत्तरस्योदाहरणद्वयं प्रदर्शयन्नाह अयमिति अयमुदितोहिमरश्मिश्चन्द्रः वनितावदनस्य स्त्रीमुखस्य कीदृशः प्रत्युत्तरं सदृशः समानः नीलादिकोपलंभः नीलादिमणीनामनुभवः कस्य प्रत्यक्षतः स्फुरति प्रत्युत्तरं सदृशः सचक्षुषः उपलंभस्त्वनुभवस्त्वमरः २५ गैरिकेति गैरिकं च मनःशिला च आदि

अयमुदितोहिमरश्मिर्वनितावदनस्य कीदृशः सदृशः नीलादिकोपलंभः स्फुरति प्रत्यक्षतः कस्य २५ गैरिकमनःशिलादिः प्रायेणोत्पद्यते कुतो नगतः यं खलु न चलति पुरुषः स्थानादुक्तः स कीदृशः २६ मध्योत्तरजातिः

यस्य हरितालहिंगुलादेः सः प्रायेण बाहुल्येन कुतः कस्मादुत्पद्यते प्रत्युत्तरं नगतः शैलात् खलु निश्चितं यः पुरुषं उक्तः स न स्थानात् न चलति स पुरुषः कीदृशः प्रत्युत्तरं नगतः गतो नेत्यर्थः २६ मध्योत्तरजातिः

अंतोत्तरजातेराद्यमुत्तरंहरणमाह कस्मिन्निति मीनगणामत्स्यसमूहाः कस्मिन्वसंति प्रत्युत्तरं वारि ज
ले वार्वारीत्यमरः किंवापदंविकल्पंवदति प्रत्युत्तरं वा विकल्पेवेत्यमरः विवस्वान्भास्करः किंकुरुते
प्रत्युत्तरं अहः दिनं दिवादिनाहनीचैवतुक्लीबेदिवसवासरौ अस्त्रियावितितारामिधानः खेतुनि

कस्मिन्वसंतिवदमीनगणाविकल्पंकिंवापदंवदतिकिंकुरुतेविवस्वान् विद्युल्लता वलय
वान्पथिकांगनानामुद्वेजकोभवतिकः खेतुवारिवाहः २७

श्चितंपथिकांगनानां अध्वगस्त्रीणां वियोगिनीनामितियावत् उद्वेजकः उद्वेगकारीकः प्रत्यु
त्तरं वारिवाहः जलधरः अब्दोधाराधरोवारिवाहोजलधरोंबुदइतितारामिधानः कीदृशो
वारिवाहः विद्युल्लतावलयवान् तडिल्लतावलयेनयुक्तइत्यर्थः तडित्सौदामिनीविद्युदित्यमरः २७

उदाहरणांतरमाह शब्दइति प्रभूगत इतिशब्दः प्रचुराभिधायी प्रचुरवाची॰ कीदृक् भवेदिति॰ हेशब्दविदो॰ वैयाकरणाविचार्यकथ्यतेति एछे॰ प्रत्युत्तरं नास्तिकवर्गमध्यः नास्तिकवर्गस्य॰ पंचवर्णात्मकस्यमध्यस्तृतीयोवर्णोगकारोयत्रसः प्रभुगतइत्यत्रगकारेगतेप्रभूतइतिशब्दः प्रचुरार्थःप्र

शब्दःप्रभूगतइतिप्रचुराभिधायीकीदृग्भवेद्वदतशब्दविदोविचिंत्यकीदृग्बृहस्पतिमतेविदिताभियोगःप्रायःपुमान्भवतिनास्तिकवर्गमध्यः २८ ग्रंतोत्तरजातिः

भूतंप्रचुरंप्राज्यमित्यमरः बृहस्पतिमतेबौद्धसिद्धांतेविदिताभियोगोज्ञाततत्वः पुमान्॰ प्रायःकीदृग्भवति प्रत्युत्तरं नास्तिकवर्गमध्यः नास्तिकानांवेदबाह्यानांवर्गःसमूहःस्तत्रमध्यःमध्येस्तित इत्यर्थः २८ २८

कथितापह्नुतेर्लक्षणमाह पदांतरेति पदयोरंतरं पदांतरं आदिना पदांशे पदमध्ये पदांते वा यः संबं
धस्तस्मात् पदवाक्येपि संस्थितं वर्त्तमानमुत्तरं यत्र न लक्ष्यते सा जातिः कथितापह्नुतिसंज्ञा स्यात् २९
अस्या उदाहरणमाह पृथ्वीति कविना विदुषा पृथ्वीसंबोधनं कीदृक् परिकीर्त्तितं इदं वि
श्वं भुवनं केन मोहितं प्रायो बाहुल्येन यशः कीर्तिः केनाप्यते एतत्प्रश्नत्रयाणां क्रमशः पदांतरादि

पदांतरादिसंबंधात्प्रश्नवाक्येपि संस्थितं कथितापह्नुतिः सा स्याल्लक्ष्यते यत्र नोत्तरं २९ पृ
थ्वीसंबोधनं कीदृक्कविना परिकार्त्तितं केनेदं मोहितं विश्वं प्रायं केनाप्यते यशः ३० ॥

संबंधात्कविनेतिपदेन प्रत्युत्तरत्र यं वदति · को · इनाः कविना एवं पदविभागे कृते हे को · हे पृ
थ्वी इः कामः स्तेन इना इः कामो मदनो मार इति ताराभिधानः केन यशः प्राप्यते कविना पंडिते
न धीमान्सूरिः कृती कविरित्यमरः ३०

उदाहरणांतरमाह कस्येति मरौधन्वदेशे कस्य दुरधिगमः दुःखेनाधिगमत् इति दुःप्राप्तिरिति यावत्
प्रत्युत्तरं॰ कस्य कं जलं तस्य कमले कृतावासः कृतवसतिः कः प्रत्युत्तरं॰ कः ब्रह्मा कः प्रजापति रुदि
ष्टः चामुंडाशक्तिविशेषा कैः तुष्टा भवति प्रत्युत्तरं॰ कैः शिरोभिः कं शिरो वनोरित्यमरः तेरिपवस्त

कस्य मरौ दुरधिगमः कमले कः कथय विरचितावासः कैस्तुष्यति चामुंडा रिपवस्ते वद कु
तो भ्रष्टा ३१ कथितापह्नुतिजातिः यत्र भंगस्य वैषम्यं विषमं तन्निगद्यते वृत्तं नामोत्तरं य
त्प्रश्नेत द्वृत्तनामकं ३२
वद्वैरिणः कुतः भ्रष्टाः वदेति पृष्टे॰ प्रत्युत्तरं कुतः कुः पृथ्वी ततः एवं पदांतरादिसंबंधेन कथिता [illegible]प
ह्नुतिरुक्ता ३१ यत्रेति यत्र प्रश्ने भंगस्य विहितपदस्याग्निमपश्चाद्भावेन वैषम्यं भवति॰ तद्विषमसंज्ञ
कमुच्यते यत्र वृत्तं नाम पद्यरीत्या॰ उत्तरं तद्वृत्तनामकं निगद्यत इति ३२ २९

तत्रविषमजातेरुदाहरणमाह कीदृगिति कीदृशं वनं भयाय न स्यादिति पृष्टे प्रत्युत्तरं अहिंस्रं न सं
ति हिंस्राः क्रूरजंतवो यस्मिं स्तत् इति पृष्टे एवंप्रकारेण प्रश्ने कृते यत् उत्तरं अहिंस्रमिति तस्योत्तरस्य
कीदृशस्य ईक्षणजातं नेत्रोत्पन्नं अंबुजलं वाच्यं भवेदिति पृष्टे प्रत्युत्तरं अहिं तदेव अहिंस्रमिति प्र
शु

कीदृग्वनं स्यान्न भयाय पृष्टे यदुत्तरं तस्यैव कीदृशस्य वाच्यं भवेदीक्षणजातमंबुकं चाधि
शेते गवि कोर्च्चनीयः ३३ अहिंस्रमहिमः एकमुत्तरं भंगवैषम्येनाह अहिंकोर्थः न विद्यते
हिंकारो यस्मिं स्तत् अस्रमित्यर्थः रोदनं चास्रमस्तु चेत्यमरः च पुनः गविजले अर्थात् क्षीरोदधौ
कं अधिकः अर्च्चनीयः पूज्यः शेते स्वपिति इति पृष्टे प्रत्युत्तरं अहिंशायः अः विष्णुः स्वर्गेषुपशुवा
ग्वज्रदिग्नेत्रघृणिभूजले लक्ष्यदृष्ट्या स्त्रियां पुंसि गौरित्यमरः ३३

वि.मु.टी.
२०
30

उदाहरणांतरमाह प्राय इति प्रायोबाहुल्येन सर्वस्मिन्कृत्ये॰ कीदृशाः पुमांसोनमोहमाप्नुवंति प्रस्तु सावधानाःसुशिक्षिताइत्यर्थः प्रश्नांतरंपुनःपृच्छति नाधा इतिशब्दोनौवाचीकीदृशोभवेदिति पृष्टेअंगवैषम्येनप्रत्युत्तरंददाति सावधानाः इत्यत्रसो॰ऽप्रधानाःएवंपदविभागेकृते नाधाशब्दः

प्रायःकार्येनमुह्यंतिनराःसर्वत्रकीदृशाः नाधाइतिभवेच्छब्दोनौवाचीवदकीदृशः ३४ सा
वधानाः विषमजातिः

धा पूर्वंअधाविधेयःनविद्यतेधाकारोयत्रसअप्रधाकारेगतेना॰ इतिस्थितःसपुनःनाशब्दःनावि धेयःकोर्थः नविद्यते आकारो यत्रसः आकारेगते॰ नइतिव्यंजनंस्थितं ततन॰ सोविधेयं कोर्थः औकारेणसहितंकर्त्तव्यं एवंकृतेनौरितिसिद्धं ३४ विषमजातिः २०

वृत्तनामोत्तस्यायमुदाहरणमाह गतेति कश्चनए ब्रूते मुनयः कुत्र तपस्यंति प्रत्युत्तरं शिखरिणि पर्वते महीध्रे शिखरि क्ष्माभृदहार्यधरपर्वताइत्यमरः कीदृशाः गतः क्लेशस्य धूमस्य धूमपानादेरायासः श्रमोयेषां ते विमलत्वमकल्मषं मनोयेषां ते स्वेआत्मनि ष्ठंतीति स्वस्थाः आत्मनिष्ठाइत्यर्थः स्वोज्ञाता वात्मनिस्वंत्रिष्वात्मीयेस्वोऽस्त्रियोधनइत्यमरः सुररिपुरिपोर्दैत्यारेः प्रियाका प्रत्युत्तरं ई लक्ष्मी ल

गतक्लेशायासा विक्लेमे मनसः कुत्रमुनयस्तपस्यंति स्वस्थाः सुररिपुरिपोः काचदयिता क

विप्रेयः किं स्यान्नवलघुयुतेरष्टगुरुभिर्वृधावृत्तं वर्णैः स्फुटघटितवंधं कथयत ३५ शिख रिणी

क्षीरीकारउच्यते हे बुधाः कवीनांप्रियं कविप्रेयः वृतंपद्यं किं स्यात प्रत्युत्तरं शिखरिणी एतत्संज्ञकं वृत्तमित्यर्थः कीदृशं नवसंख्यावर्णा लघवो यत्र अष्टसंख्यागुरवो यत्र तैर्वर्णैः स्फुटं प्रकटं घटितोवंधोयस्यतत ३५

उदाहरणांतरमाह उरसीति मुरभिदो मुरारेः उरसि वक्षसि गाढं आलिंगिता का· आस्ते· तिष्ठति प्रश्नुत्तरं मा·
लक्ष्मीः नंदने इंद्रस्य वने सरसिजानां पद्मानां मकरंदैः पुष्परसैः आमोदिता हर्षिता का· प्रश्नुत्तरं अलिनी·
भृंगी नंदनं वनमित्यमरः छंदसामाप्यादीनामप्याउत्कृष्टा वृत्तिः का प्रश्नुत्तरं मालिनी कीदृशी गि

उरसि मुरभिदः का गाढमालिंगितास्ते सरसिजमकरंदामोदिता नंदने का । गिरिसमलघुवर्णैर्लेवाख्या
ति संख्यैर्गुरुभिरपि कृता का छंदसां वृत्तिरग्र्या मालिनी वृत्तनामजातिः

रसोष्टौ तत्संख्य समाना लघवो वर्णा यत्र ते अग्र्णैर्वाख्यातिः सप्त· तत्संख्यैर्गुरुभिर्दीर्घवर्णैरपि कृता
घटिता छंद एतल्लक्षणं प्रथम मगणः षट्कं विद्यते यत्र कांते· तदनु वदशमं चेद् क्षरं· द्वादशां एं
ते वसुभिरथ तुरंगैः यत्र कांते विरामः सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा ३६ वृत्तनाम फि ३१

इदानीं धातुरूपोदाहरणेन दश लकाराः प्रदर्श्यंते एकमिति यत्र प्रश्ने सुश्लिष्टत्वात्संमिलितत्वा
दुपसर्गादिभिः एकमेवोत्तरं सुप्तिङं तयोः प्रभेदः सुप्तिङं तत्प्रभेदस्ते नद्विधादिः प्रकारं भवेत्

एकमेवोत्तरं यत्र सुश्लिष्टत्वाद्द्विधा भवेत्
सुप्तिङं तत्प्रभेदेन नामाख्यातं तदुच्यते ३१

तन्नामाख्यातसंज्ञं प्रश्नमुच्यते ग्रंथिमश्लोकद्वयेनेत्यर्थः ३१ तत्र दशसु लकारेषु वर्तमा
नार्थे तावत् लट उदाहरणमाह

समरेति समरशिरसि समरस्य युद्धस्य शिरः अग्रं तस्मिन् यद्वा उत्तमांगं शिरः प्रोक्तमिति स्मृतेः समरशि
रसि रणाग्रे एष कीदृशं सैन्यं दुर्निवारं वारयितुमशक्यमिति एष प्रस्तुतरं अभि॰ न विद्यते भीर्यत्र तत् शिरो
ग्रे [illegible] खरमित्यमरः कीदृशो व्योम्नि [illegible] आकाशे शोभा कांतिः प्रस्तुतरं भवति भं नक्षत्रं
लक्षति भवति कथंभूते व्योम्नि विगतघननिशीथे विगतः घनः अभ्ररहितो निशीथो रात्रिर्यस्मिन् विधिव

समरशिरसि सैन्यं कीदृशं दुर्निवारं विगतघननिशीथे कीदृशे व्योम्नि शोभा कुपि विधिवशे म
न प्राप्य योग्याभिमानं जगदखिलमनिंद्यं दुर्जनः किं करोति ३८ अभिभवति

शेन भाग्यवशेन कमपि योग्यस्य सत्पुरुषस्याभिमानं अहंकारं प्राप्य लब्ध्वा अनिंद्यं स्तुत्यमखिलं
जगद्विश्वं दुर्जनः खलः किं करोति प्रस्तु॰ अभिभवति पराभवति तिरस्करोतीत्यर्थः भाग्यं स्त्री नियति
विधिरित्यमरः अभिपूर्वं भू सत्तायामित्यस्य धातोः सामान्यपुरुषस्यैकवचनं परस्मैपदं ३८

लिरोद्वितीयमुदाहरणमाह भवतीति रथानां शकटानां गमनयोग्या भूः कीदृशी भवति प्रत्युत्तरं समा॰ उच्चावचरहिता भोजनांते॰ भोजनावसाने अतिमधुरमन्नं किंप्रदेयं प्रत्युत्तरं दधि हे प्रिय तम॰ नीचामंत्रणे॰ नीचजनसंबोधने॰ किंपदं प्रत्युत्तरं रे॰ इतिपदं कुमतिकृतविवादाः कुमत्या कुबुद्ध्या कृतो विवादः कलहो यैस्तै॰ तादृशाः पुरुषाः सदर्थैः समीचीनः अर्थः प्रयोजनं येषां तैस॰

भवति गमनयोग्या कीदृशी भूः रथानां कमिति मधुरमन्नं भोजनांते प्रदेयं प्रियतम वद नीचामं त्रणे किंपदं स्यात् कुमतिकृतविवादाश्चक्रिरे किं सदर्थैः ४१ समादधिरे

दर्थाः स्तैः सदर्थैः पंडितैः किंचक्रिरे॰ किंकृताः वदेति ॥ प्रत्युत्तरं समादधिरे समाधानीकृता प्र बोधिता इत्यर्थः अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः सम पूर्वः डुधाञ् धारणपोषण योरित्यस्य धातोः सामान्यपुरुषमध्यवचन [illegible] ४१

प्र

इत्यनेनोक्तमुदाहरणमाह वदेति कश्चन पृच्छति नरत्तमं अनुत्तमं च तद्वचनं अनुत्तमवचनं वदत
कथयेति पृष्टे प्रत्युत्तरं अवमं निकृष्टमित्यर्थः निकृष्टं तिकृष्टावरेफ याप्यावमाधमा इत्यमरः यो
ध्वनिः शब्द उच्चैरुच्यते सकोष्णकः प्रत्युत्तरं तारः अत्युच्चो ध्वनिरित्यर्थः तारोत्युच्चैस्त्रयस्त्रिष्वि

वदतानुत्तमवचनं ध्वनिरुच्चैरुच्यते सकोऽष्णकः तव सुहृदो गुणनिवहैरिपुनिवहं किंनु कर्त्तारः ४२
अवमं तारः

त्यमरः तथा तव सुहृदस्तव मित्राणि गुणनिवहैः गुणसमूहैः रिपुनिवहं शत्रुसमूहं नु इति वि
तर्के किं कर्त्तार इति पृष्टे प्रत्युत्तरं अवमंतार अवहेलनां कर्त्तार इत्यर्थः अवपूर्वमनज्ञान इत्यस्य
धातोः साम[illegible]परस्मैपदं ४२

तस्यैवोदाहरणांतरमाह कीदृगिति कीदृशं तोयं जलं तत्तु मिद्धुस्तितीर्षुस्तस्य तितीर्षोः पुरुषस्य दुस्तरं तत्तु मशाकंचस्यात् प्रत्युत्तरं अत्र न विद्यते नौ यत्र तत्त नौकारहितमित्यर्थः अस्मिंल्लोके पूज्याः गरीयसी काः प्र त्युत्तरं माता जननी गर्भधारणपोषाभ्यां तेन माता गरीयसीति स्मरणात् त्वद्भुं अपि त्र यस्व आवक्षस्व आमं ३
प्रत्युत्तरं अस्ये असिः त्वद्रुस्तस्य संबुद्धौ हे असे त्वङ्क्षत्रनिस्त्रिंशचंद्रहासासिरिष्टयइत्यमरः हे मानवि

कीदृक्तोयं दुस्तरं स्यात्तितीर्षोः का पूज्यास्मिन् त्वङ्गमामंत्रयस्व दृष्ट्वा धूमं दूरतो मानविज्ञाः

किं कर्त्तास्मि प्रातरेवाश्रयाशं ४३ अनुमातासे लुट्लकारः

ज्ञाः अनुमानकुशलाः प्रातः प्रभाते दूरतो धूमं दृष्ट्वा अहं आश्रयाशं पावकं प्रति किं कर्त्तास्मि प्रत्यु त्तरं अनुमातासे यत्र धूमस्तत्र वह्निरित्याद्यनुमानेनानुमितं कुरुषेइत्यर्थः आश्रयाशो दहनोनः कृ शानुः पावकोनलइत्यमरः अनुपूर्वमाङ्माने इत्यस्य धातोर्मध्यमपुरुषस्यैकवचनं ४३

वि.सु.टी.
३५
35

लृट्लकारस्योदाहरणंश्लोकद्वयेनाह कामुकाइति कामिनः कयासहनीचाः स्युर्निकृष्टाभवंति प्रत्युदाह
रणं दास्या दासीचेटी· तया सर्वः प्रजालोकः कस्मिन्प्रमोदते· हर्षमाप्नोति प्रत्युत्तरं महे उत्सवे महउ
द्धवउत्सवइत्यमरः तुल्याहंपुण्यदिनं प्राप्य· अर्थिनः याचकान्प्रतिवसूनि द्रव्याणि किंकरिष्या
ध्वे मोदातार इत्यध्याहारः प्रत्यु· दास्यामहे दास्यामइत्यर्थः डुदाञ्दानेइत्यस्य धातोरुत्तमपुरुषबहु

कामुकास्युः कयानीचाः सर्वः कस्मिन्प्रमोदते अर्थिनः प्राप्यतुल्याहं करिष्यध्वेवसूनि किं ४४
दास्यामहे कोदुःखी सर्वकार्येषु किं भृशार्थस्य वाचकं योयत्रविरतोनित्यं ततः किं स करिष्यति ४५
प्रयास्यति लृट्लकारः

वचनमात्मनेपदं ४४ क इति सर्वकार्येषु दुःखीदुःखयुक्तः कः प्रत्युत्तरं प्रयासी प्रयासः श्रमोस्यास्ती
तिप्रयासी· श्रांतइत्यर्थः भृशार्थस्य अतिशयार्थस्य वाचकं किं प्रत्यु· अतिशयेप्यतीत्यमरः नित्यंयः पु
मानयत्रस्थाने विरतः उदासीनतांप्राप्तः सपुमान् ततस्तदनंतरं किंकरिष्यति प्रत्यु· प्रयास्यति ग
मिष्यतीत्यर्थः प्रपूर्वैया प्रापणइत्यस्य धातोः सामान्यपुरुषस्यैकवचने परस्मैपदं ४५ लृट्लकारः ३५

इदानीं लोट् उदाहरणं छ्लाभ्यामाह [illegible] विद्यंत इत्यस्य समानार्थवाची शब्दः कः प्रत्युत्तरं संति विद्यंत इत्यर्थः मु
द्राराजनामा कित्तं मुद्रां किंम् अचिरयति अस्थिरीकरोति प्रसु अजतु लाक्षारहितं राक्षालाक्षाजतु क्लीवइत्य
मरः यदि कथमपि केनापि हेतुना कोपः क्रोधः स्यात्तस्य तं प्रति सुजनः किं करोतु वदेति ९ हे प्रभु संत्यजतु
परित्यागं करोतु संपूर्वत्यजहानावित्यस्य धातोः सामान्यपुरुषस्यैकवचने परस्मैपदं ४६ मेघेति मेघात्य
ये मेघावसाने शरत्काले सुभगावगाहाः मज्जनयोग्याः काप्रसु नदी सरित् वसंततिलक संज्ञकं पद्यं किम

विद्यंत इति समानार्थः शब्दः कोऽचिरयति मुद्रां किं कथमपि यदि कोपः स्यात्तं सुजनः किं करो
तु वद ४६ संत्यजतु मेघात्यये का शुभगावगाहा वृत्तं वसंततिलकं कियदक्षराणां भोभोक
दर्यपुरुषा विप्रुवद्दिने च वित्तं च नः सुबहु तत्क्रियतां किमेतत् ४७ नदीयतां लोट्

दक्षराणां प्रसु इयतां एतद्वृत्तोक्तानां भोभोः कदर्यपुरुषाः निकृष्टजनाः विषुवद्दिने संक्रांतौ नः अस्माकं
वित्तं धनं बहु विपुलमस्ति तद्देतद्वित्तमस्माभिः किं क्रियतां प्रत्युत्तरं दीयतां भवद्भिर्दीयतामित्यर्थः डुदा
ञ्दाने इत्यस्य धातोः सामान्यपुरुषस्यैकवचने मात्मनेपदं ४७

त्म

वि·मु·टी·
३६
36

लुङ्उदाहरणं श्लोकद्वयेनाह कति मकरंदैः पुष्परसैः कामाद्याति· मत्तां भवति प्रत्तु· अली· भृङ्गी· जनकसु
ता· जानकी· कं· पुत्रमसूत सुषुवे प्रत्तु· लव लवाभिधानं हे· कृषीवलरूक्षक· पक्वं परिणतं धान्यं· त्वमपि
किं अचीकरः किं कृतवानसि प्रत्तु· अली लवं लुनन्तं पुरुषं प्रेरितवान् ल्लौत्वर्थः लुञ् छेदने इत्यस्य धातो
रुत्तमपुरुषस्यैकवचनं ४८ एधांतीति कृष्णनपुरुषः एधति असांभूमौ· वज्रकृत्तपक्षतयः कुलिशच्छिन्न

कामाद्यति मकरंदैस्तनयं कमसूत जनकराजसुता कथय पक्वकृषीवलरूक्षपक्वं किमचीकरस्त्वमपि ४८
अलीलवे एधति पुरुषः केऽस्यां समभूवन् वज्रकृत्तपक्षतयः वद भयदेशं जिगमिषुरेकाकी वार्य
ते च कथं ४९ मानववनगाः लुङ् लकारः

पक्षमूलाः के समभूवन्· बभूवुः प्रत्तु· मानववनगाः हे मानव मनुष्य· नगाः शैलाः स्त्री पक्षतिः पक्षमूल
मित्यमरः च पुनरर्थे· वद भययुक्तं देशं जिगमिषुर्गन्तुमिच्छुः एकाकी· असहायः कथं वार्यते· निषि
ध्यते· साधुभिरिति शेषः प्रत्तु· मानववनगा हे अनवन· न विद्यते अवनं रक्षणं यस्य सः हे रक्षाहीन·
मागाः मागच्छ गमॢ गतावित्यस्य धातोर्मध्यमपुरुषस्यैकवचनं परस्मैपदं ४९ लुङ् ३६

लङ्‌ उदाहरणं द्वाभ्यां माह किमिति अहं हरिः कृष्णः स्वबाहुसामर्थ्येन गवां हितं विदधातुमिच्छुः महिध्रं शैलं
किं प्रकरवं किं कृतवानास्मि प्रत्युत्तरं अधरं धृतवानस्मि पुनः एवमिति प्रियतमवदनेन प्रेक्षणं खेन दयितायाः
पक्वबिम्बीफलवर्णताम्रः कः पीयते प्रत्यु· अधरः ओष्ठः डुभृञ्‌ धारणपोषणयोरित्यस्य धातोर्मध्यम
पुरुषैकवचनं ५० पततीति अहितः शत्रुस्तु वनयात्किं परित्यजति प्रत्यु· समरं युद्धं अयेति प्रश्नो कदा
पि कस्मिन्नपि काले· इह पृथिव्यां भीरुः केनाविरति· नाप्नोति· प्रत्युत्तरं· जयं विजयं मंगलानंतरारंभ

किमकरवमहं हरिर्महीध्रं स्वभुजबलेन गवां हितं विधित्सुः प्रियतमवदनेन पीयते कः परि
णतबिंबफलोपमः प्रियायाः ५० अधरः परिहरति भयात्तवाहितः किं कमथ कदापि न विंद
तीह भीतः कथय किमकरोरिमां धरित्रीं नृपतिगणैर्नृपते त्वयं त्वमेकः ५१ समरं जयं लङ्लकारः

प्रश्नकालस्यैव यथो अयेत्समरः हे नृपते· षड्भिः संध्यादिभिर्नृपतिगणैस्त्वमेकः एकएव· स्वयमात्म
ना· पृथ्वीं किं प्रकरोः किं कृतवानासि· प्रत्युत्तरं समरंजयं अनुरंजितवानास्मि संधिर्नोविग्रहो यानमा
सनं द्वैधमाश्रयः षड्गुणाः इत्यमरः समपूर्वरंजरागे इत्यस्य धातोर्लङ्‌मध्यमपुरुषैकवचनं ५१ लङ्‌

लिङ्॰ उदाहरणं द्वाभ्यामाह कीदृगितिरणे कीदृशी चमूः धारयितुमशक्या प्रस्तु॰ पराउत्कर्षे वीरः सुभ
टः धनं वांछन् कस्मै स्पृहयति वांछां करोति प्रस्तु॰ आजये युद्धाय समित्याजिसमिद्युध इत्यमरः जित्वा वा
मोक्षसे महीमिति स्मृतेः भुवः पृथ्व्याः संवृद्धिः का॰ प्रस्तुतं महि हे पृथ्वी हे सुभटजनाः शूराः रणेः भ्रातृ
व्यान्॰ शत्रून्॰ किं कुवीर्ध्वं॰ किं कुरुत प्रस्तु॰ पराजये महि पराजयं कुर्मः परापूर्वे जिजय इत्यस्य धातोः

कीदृक्सेना भवति रणे दुर्वारा वीरः कस्मै स्पृहयति लक्ष्मीमिच्छन् कार्यबुद्धिर्भवति भुवः संग्रामे किं
कुर्वीध्वं सुभटजना भ्रातृव्यान् ५२ पराजयेमहि कंसाराते र्वद्गमनं केन स्यात्कश्चिन्नहृष्टिं लभ
ते स्वल्पेहुः किं सर्वेषां शुभमूर्द्धवीराः किं कुर्यास्त्वं सुजन सशोकं लोकं ५३ विनोदयेयं लिङ्

तमप्रत्ययस्य बहुवचनं भ्रातृव्यौ भ्रातृजद्विषाविति अमरः ५२ कंसारातेः कृष्णस्य गमनं केन॰ प्रस्तुत्तरं
विना॰ विः पक्षी॰ तेन स्वल्पकामः हर्षं कश्चिन्नाप्नोति॰ प्रस्तु॰ उदये वृद्धौ सर्वेषां शुभं किं प्राहुः प्रस्तु॰ अयं
अयः शुभावहो विधिस्तं हे सुजन॰ शोकेन सहितं लोकं त्वं किं कुर्याः॰ किं करोषि प्रस्तु॰ विनोदयेयं विनो
दयामि विपूर्वे नुदप्रेरणे इत्यस्य धातोः लिङ् उत्तमपुरुषैकवचनं ५३ लिङ्

लङ्॰ उदाहरणद्वयं द्वाभ्यामाह वारणोंद्र इति कीदृशो गजराजः भृंगसमूहस्य प्रीतये भवेत् प्रत्यु॰ समाश्रयस्य म
देनदानेन सहितमाश्रयस्त्वं यस्य सः यदि अप्रयच्छं यज्ञमकरिष्यं॰ तदास्मै विप्राय धनमहं किमकरिष्यं॰ प्रत्यु॰
समदायस्य तदात्वया विप्राय धनं दत्तं स्यादित्यर्थः डुदाञ् दाने॰ इत्यस्य धातोर्मध्यमपुरुषैकवचनं परस्मैपदं
५४ काल इति नरः काले देशे यथायुक्तमुचितं कुर्वन् किं प्राप्नोति प्रत्युत्तरं अहास्यतां हास्यभावं नाप्नोति भुक्त

वारणेंद्रो भवेत्कीदृक् प्रीतये भृंगसंहतेः यद्यप्रयच्छं तदास्मै किमकरिष्यमहं धनं ५४ समदायस्य काले
देशे यथायुक्तं नरः कुर्वन्नुपैति किं भुक्तवंतौ वालिशेतां चेत्किमन्नं करिष्यतां ५५ अहास्यतां लङ्

नार्मख्यातजातिः

वंतौ भोजनं कृतवंतौ॰ प्राक् पुनश्चेद्यदि॰ अन्नमोदनादि भक्ष्यमलिप्सेतां प्राप्तवंतौ तदा तौ॰ अन्नं किं करि
ष्यतां॰ प्रत्युत्तरं अहास्यतां अत्यक्ष्यतां त्यागं करिष्यतामित्यर्थः ओहाक् त्यागे॰ इत्यस्य धातोः सामान्यपुरु
षद्विवचनं परस्मैपदं ५५ लङ् नामाख्यातजातिः॰

ज्ञेयमिति तर्कोत्तरेण [illegible] हिमांशीति हिमसंहत्या छादितौ चंद्रसूर्यौ कीदृशौ भवेतां प्रत्युत्तरं अभौ
तार्क्यं ज्ञेयं एवं तदुत्तरे सौत्रं शाब्दीयं शास्त्रजमिति [illegible] चतुर्विधं प्रश्नमिति ५६ ते श्रुतार्क्यजाते
स्ताहरणद्वयं प्राग्भ्यामाह हिमानीति हिमसंहत्या छादितौ चंद्रसूर्यौ कीदृशौ भवेतां प्रत्युत्तरं अभौ भारहितौ
हिमानी हिमसंहतिरित्यमरः पूज्यः कः प्रत्युत्तरं अः विष्णुः प्रमाणेभ्यः सकाशात्कः प्रभाकरस्य जैमिनेर्यस्य सं

ज्ञेयं तर्कदृशा तार्क्यं सौत्रं सूत्रोत्तरैस्तथा शाब्दीयं शब्दसंज्ञाभिः शास्त्रजं शास्त्रभाषया ५६ हिमानीष्य
जितौ स्यातां कीदृशौ शशिभास्करौ कः पूज्यः कः प्रमाणेभ्यो न प्रभाकरसंमतः ५७ अभावः के प्रवीणाः
कुतो हीनं जीर्णवाससोंशुमांश्च कः निराकरिष्णवो बाह्यां योगाचाराश्च कीदृशाः ५८ विज्ञानवादिनः

तार्क्यजातिः

मतो न भवति प्रत्युत्तरं अभावः अभाववाद इत्यर्थः ५७ क इति निपुणाः के प्रत्युत्तरं विज्ञाः कुशलाः जीर्णवस्त्रं
कस्मात् हीनं प्रत्युत्तरं नवात् नूतनात् अंशुमान् सूर्यः कः प्रत्युत्तरं इनः सूर्ये प्रभावित्यमरः बाह्यां बौद्धनिराक श्रीराम
रिष्णवो निराकर्त्तुकामाः योगाचाराः प्रधानात्मनिष्ठाः कीदृशाः प्रत्युत्तरं विज्ञानवादिनः अद्वैतवादिनः ५८ ता ३८

इनेः २

सौत्रस्योदाहरणं द्वाभ्यामाह कइति सकलं विश्वं स्वस्ववशं कः प्रापयति प्रत्युत्तरं यमः ऽतंकः अथानंतरं वि
ष्णुः किं विभरां वभूव किं धृतवान् प्रत्युत्तरं अगं शैलं गोवर्द्धनाभिधानं रुद्रः कस्मिन् सामिमानः प्रत्युत्तरं ध
विन्ते ने. च पुनः पाणिनि सूत्रं कीदृक्षं प्रत्युत्तरं यमोगंधने. इत्येवं रूपं ५८ किमिति विशेष्यस्यानिष्टाख्यातिर्यस्मि
स्तत् विशेष्यनिष्ठं किं स्यात् प्रत्युत्तरं विशेषणं पूरणी संख्या का. वद त विज्ञाः इति शेषः प्रत्युत्तरं एका ए

कोनयति जगद्शेषं स्वयमथ विभरां वभूव किं विष्णुः नीचः कुत्र सगर्वः पाणिनी सूत्रं च कीदृक्षं ५९
यमोगंधनैं किं स्याद्विशेष्यनिष्ठं का संख्यो वदत पूरणी भवति नीचः केन सगर्वः सूत्रं चंद्रस्य की
दृक्षं ६० विशेषणमेकार्थेनं सौत्रजितिः
केति संख्यापूरणे नीचः क्षुल्लकः केन समदः प्रत्युत्तरं अर्थेन विभवेन चंद्र वैयाकरण सूत्रं कीदृ
शं प्रत्युत्तरं विशेषणमेकार्थेन. इति स्वरूपं इंद्रः चंद्रः काशकृत्स्नः पिशलीशाकटायनः पाणि
न्य[illegible]मरजैनेंद्राजयंत्यष्टौ शाब्दिकाः इति ६० सौत्रजातिः
हि

शाब्दीयजा॰तेरुदाहरणद्वयंप्रश्नमाह नेति दुर्जनः कस्मैनश्लाघतेन प्रशंसति प्रत्युत्तरंपरस्मै॰ अन्य
स्मैश्लाघामुत्ताप्रशंसापंपरित्वयोभिलाषयोरितिविश्वः सुप्तिङ॰अंतेयस्यतत्किमुच्यते प्रत्युत्तरं पदं
विभक्त्यंतमित्यर्थः लकारादेशानांनवानां तिङ॰वचनानांनामकिं उच्यतां प्रत्युत्तरं परस्मैपदं नवपर
स्मैपदानि ९।१ किमिति अव्ययस्यभावः अव्ययेनातयाकिंप्रसिद्धं प्रत्युत्तरं स्वः स्वरव्ययमित्यमरः लो

नश्लाघतेखलःकस्मैसुप्तिङं॰तंकिमुच्यते लादेशानांनवानांचातिङांकिंनामकथ्यतां ९।१ परस्मै
पदं किमव्ययतयाख्यातंकस्यलोपोविधीयते ब्रूतशाब्दविदोज्ञात्वासमाहारः कउच्यते ९।२ स्वरि
तः शाब्दीयजातिः
पः कस्यक्रीयते प्रत्युत्तरं इतः इत्संज्ञकस्य यस्येत्संज्ञातस्यलोपः हेशाब्दिका॰वैयाकरणाः विचार्य
वदत समाहारसंज्ञकः कः उच्यते प्रत्युत्तरं स्वरितः समवृत्त्यास्वरितः ९।२ शाब्दीयजातिः ३९

शास्त्रजातेरुदाहरणद्वयेदाभ्यामाह जलदेति जलदात्यये॰ अर्थाच्छरत्काले समदः सकामः कः प्रत्यु
त्तरं श्वा॰ कुक्कुरः च पुनः जलदात्यये सुभगं किं प्रत्युत्तरं सरः सरसी मुरारिः कं धृतवान् प्रत्युत्तरं
अगं॰ फलं कटुतैलेन युक्तो गुडस्त्रिगुणसप्तादिनैरेकविंशतिसिद्दिनैः कं नाशयति प्रत्युत्तरं श्वास
रोगं ६३ कीदृगिति दीपवर्त्तेः शिखा ज्वालाः प्रातःकाले॰ कीदृक् स्यात् प्रत्युत्तरं विभा विछाया उष्टः

जलदात्यये भवति कः समदः सुभगं च किं कमधरन्मुरामित् कटुतैलमिश्रितगुडो निघ्नतं विनिहं
ति कं त्रिगुणसप्तदिनैः ६३ श्वासरोगं कीदृक् प्रातर्दीपवर्त्तेः शिखा स्यादुष्टः एक्षत्याभजंते मृगाः
किं देवामात्ये किंगते प्रायशो सौ लोकः कुर्यान्नो विवाहं विविक्तः ६४ विभाकरभवनं शास्त्रजातिः

करभः एक्षति मृगाः किमाभजंते प्रत्युत्तरं करभवनं हे करभ वनं देवामात्ये गुरौ॰ किंस्थानं गते प्रायशः
असौ लोकः विविक्तो विवेकी विवाहं नो कुर्यात् न करोति प्रत्युत्तरं विभाकरभवनं विभाकरः सूर्यः स्त
स्य भवनं सिंहराशिं सिंहस्य चाधिपः सूर्य इति भवनदीपः सिंहस्थे च गुरौ विवाहो नैव शोभनेइति ६४

वि.मु.टी.
४०
40

यत्रप्रश्ने पृथक्स्थगवर्णएवोत्तरंस्यात्तद्वर्णोत्तरसंज्ञमुक्तं यत्रतुवाक्यमुत्तरं तद्वाक्योत्तरंस्मृतमिति ९५
काविति पृथिव्यांकौशात्रूविख्यातौ प्रत्युत्तरं वी उभ्यइभ्यविः तौवी हरकामौ किंपदं॰ शोकंवदतिप्र
त्युत्तरं हा॰ इत्यव्ययं हाविषादेचशोकेचेतिविश्वः अत्रलोके दरिद्रस्याभीष्टः कः प्रत्युत्तरं राः अर्थः
चपुनः भिक्षुभिः केसेव्यंते प्रत्युत्तरं वीहाराः बौद्धायतनानि विहारोभ्रमणेस्कंधेलीलायांसुगतालय

वर्णएवोत्तरंयत्रतद्वर्णोत्तरमुच्यते वाक्यंयत्रोत्तरंतत्तुवाक्योत्तरमितिस्मृतं ९५ कौशात्रूभुविविख्या
तौशोकंवदतिकिंपदं कोभीष्टोत्रदरिद्रस्यसेव्यतेकेचभिक्षुभिः ९६ वीहाराः किंमुंचंतिपयो
वाहाः कीदृशीहरिवल्लभा पूजायांकिंपदंकोग्निः कः कृष्णेनहतोरिपुः ९७ कंसासुरः वर्णोत्तरजातिः

इतिविश्वः ९६ किमिति मेघाः किंमुंचंति प्रत्युत्तरं कं॰ जलमित्यर्थः हरिप्रियाकीदृशी प्रत्युत्तरं सा॰ अः
विष्णुस्तेनसहितासा पूजायांकिंपदं प्रत्युत्तरं सुः इत्यव्ययं अग्निः कः प्रत्युत्तरं रः अग्निःरःपावके ४०
चतीक्ष्णेचेतिविश्वः कृष्णेनकोरिपुर्हतः कंसासुरः ९७ वर्णोत्तरजातिः

तिः एवं तच्चैयोवा वक्तुं वा कोत्तरजातेराद्यमुदाहरणमाह दधाविति हरिर्विष्णुः कं दधौ प्रत्युत्तरं अगं शै
लं गोवर्द्धनाभिधं शैलवृक्षौ नगावगावित्यमरः शुचि शुक्लं अभ्रं मेघः कीदृक् प्रत्युत्तरं अकं जलरहितं
कं शिरोम्बुनोरित्यमरः न विद्यते कं सुखं यस्मिन् सः अकः सुखरहितः एवंभूते सशोकः पुरुषः किं कुरुते
प्रत्युत्तरं अकरोदिति हे अक सशोक रोदिति रोदनं करोति कं सुखेपि प्रकीर्तितमिति धनंजयः एवं

दधौ हरिः कं शुचि कीदृगभ्रं एवंभूत्यकः किं कुरुते सशोकः श्लोकं विधायापि किमित्युदारः कविर्न तोषं
समुपैति भूयः ९८ अगमकमकरोदिति

एवंभूते श्लोकं विधायापि पद्यं कृत्वापि उदारः कविः महान् कविः किमिति हेतोः भूयः पुनरपि
तोषं नाप्नोति प्रत्युत्तरं अगमकमकरोदिति गमयति बोधयतीति गमकं न गमकं अगमकं
अबोधकं कृतवानिति हेतोः उदारो दातृमहतोरित्यमरः ९८

तस्यैवोदाहरणांतरमाह लक्ष्मीधरा इति विष्णुः पृच्छति कीदृशोन्नयः सपत्नैरपि शत्रुभिः कृत्वा दुर्निवा
रो वारयितुं शक्यः स्यादिति ९९ प्रत्युत्तरं समजनि तनयः मा लक्ष्मीः तया सहितः समः तत्संबुद्धौ
समसलक्ष्मीक विष्णो जनितनयः जनित ॥ जनितः उत्पादितो नयः यथोक्तो राजधर्मीये नृसः
सम्यक् यथा स्यात्तथा स्वकीयं पितृत्वमात्मविषये पितुर्भावमारोपयितुं नरेण पुरुषेण किं

लक्ष्मीधरः पृच्छति कीदृशः स्यान्नयः सपत्नैरपि दुर्निवारः ॥ प्रकारि किं ब्रूहि नरेण सम्यक् पि
तृत्वमारोपयितुं स्वकीयं ९९ समजनि तनयः वाक्योत्तरजातिः इति श्रीधर्मदासविरचिते वि
दग्धमुखमंडने द्वितीयः परिच्छेदः

मकारि किं कृतं प्रत्युत्तरं समजनि तनयः पुत्रः समजनि समुत्पादितः ९९ वाक्योत्तरजातिः
कृष्णस्य ताराचंद्रेण कृता विदग्धमनोहरा टीकेयमस्यां पूर्णोयं परिच्छेदो द्वितीयकः

यस्मिन्श्लोके श्लोक एवोत्तरं तत्र श्लोकोत्तरसंज्ञं । अर्द्धश्लोकोत्तरान्तं श्लोकोत्तरसंज्ञं पादोत्तरं पादोत्तरसंज्ञमुच्यते १ तत्र श्लो
कोत्तरस्योदाहरणं द्वाभ्यामाह । कमिति । कं देवं केः चं यन्ति पूजयन्ति । प्रत्युत्तरं । अं विष्णुं । जनामनुष्याः निशि रा
त्रौ । स्फुटरविः प्रकटद्युति । किं । प्रत्युत्तरं । मं नक्षत्रं । दुःखयुक्ता स्त्री । कीदृशी । प्रत्युत्तरं अहारा । अं गता आवरीहिता । चक्रं स्थाने
सदा कीदृगास्ते । तिष्ठति । प्रत्युत्तरं । अरि

श्लोक एवोत्तरं यत्र तच्छ्लोकोत्तरमुच्यते श्लोकोत्तरं भवेदर्द्ध श्लोका सादनदुत्तरं १
कं देवं केचयन्ति स्फुटरवि निशि किं कीदृशी दुःखिनी स्त्री कीदृक् चक्रं सदास्ते कच
तर्यविजयः स्यादृषः कीदृशां खं

अराशिकी लानि विद्यन्ते यस्मिंस्तत् । अरि । च पुनः तर्यविजयः कुत्र । प्रत्युत्तरं वाहो । भुजे स्याद्वृषः वर्षाकालस्य । ख
माकाशं कीदृशं । प्रत्युत्तरं । घनि । घना । मेघाः संति यस्मिंस्तत् ।

वि॰ सु॰
टी॰
४२

42

प्रेतस्य शावस्य योग्यां कामाहुः ॥ प्रत्युत्तरं । चितां । प्रेतशय्यां । सुकृतिनः पुण्यात्मानः कीदृशाः ॥ प्रत्युत्तरं गराः श्रेष्ठाः गगनमेव गगनतलं॰ आकाशं॰ कं धत्ते॰ कं च धत्ते॰ प्रत्युत्तरं । कदंबकं । कं जलं ददातीति॰ कदो मेघ॰ स्तं । वकं॰ पक्षिविशेषं च । कीदृशं गगनतलं॰ जनानां॰ अलमत्यर्थं प्रेक्षणीयं द्रष्टुं योग्यं ॥ २ ॥ सुदं प्रयच्छति॰ नवकुसुमाशोकं कालं॰ अर्थाद् वसंतसमयं॰ आशायाधिगम्य॰ प्रश्नः

कामाहुः प्रेतयोग्यां कथय सुकृतिनः कीदृशाः स्युः पुमांसः कं धत्ते कं च धत्ते गगनतलम
लं प्रेक्षणीयं जनानां । २ । प्रश्नः कीदृक् कास्ति स्फुटनवकुसुमाशोकमासाद्य कालं
। किं मुंचंत्यंबुवाहा भवदरिनिवहे संज्वरः किं भवेच्च ।

पर्कटी प्रश्नः कीदृक् च कास्ति द्योतते । चकास्ति दीप्तौ । प्रत्युत्तरं । दली । दलानि पर्णानि संत्यस्मिन्निति दली सोऽजटीपर्कटी । स्यादित्यमरः ॥ अंबुवाहा जलदाः किं मुंचंति । मुञ्च मोचने । प्रत्युत्तरं । कं जलं भवदरिनिवहे॰ भवतां शत्रुसमूहे॰ संज्वरः संतापः ...

नेत्रयोः प्रावृतिः प्रावरणं किं। प्रत्युत्तरं। पक्ष्म नेत्रलोम। पक्ष्माक्षिलोम्नि किंजल्के तंत्वाद्यंशेप्यणीयसीत्यमरः। अतिशयेन लघवः के। प्रत्युत्तरं। अणवः। लवलेशकणाणवइत्यमरः। व्रीहिभेदः कः। प्रत्युत्तरं। यवः। हे प्रियतम अतिप्रेष्ठ। प्रायेण बाहुल्येन प्रावृषेण्याः वर्षाकालीना दिवसाः कीदृशाः कीदृशाश्च भवंति। प्रत्युत्तरं। पुनः सर्वं। अंजनाभे त्यादि। अंजनाभाः कज्जलसकांतयो ये महांतो वारिवाहा मेघा

किं नेत्रप्रावृतिः स्यादतिशयलघवः के च को व्रीहिभेदः प्रायेण प्रावृषेण्याः प्रियतम दिवसाः कीदृशाः कीदृशाश्च ॥ ३ ॥ अंजनाभमहावारिवाहा घनचितास्वराः कदंबकंदलीकंदरजःपक्ष्मलवायवः ४

स्तेषामाघोषैः समूहैर्निचितं व्याप्तमंबरमाकाशं येषु ते तादृशाः पुनश्च। कदंबो नीपवृक्षः कंदली रक्तविशेषः कदंबो बकुलद्रुमः

दं २ कदंबकंदलीकंदानां रजोभिः परागैः पक्ष्मलाः पुष्टा वायवो येषु ते। कलघनौ कंदली स्यात्... विशेषयोरिति विश्वः। मूलेबकुल

वि॰मु॰
टी॰
४३

43

म्लो कोत्र रजाते रूपहर रक्तं नरंध्रा मामार॥ कुर्यादिति। निशिरतो॰ कीदृशं सरः कासारः कमपि वियोगिपुरुषं॰ उद्वेगवंतं कुर्या
दिति पृच्छा। प्रत्युत्तरं। कोकि। कोकाश्चक्रवाका विद्यंते यस्मिन्सतः। चक्रवाकास्तु रात्रौ सरसि वियुक्तास्तिष्ठंति। तेषां शरे

कुर्यादुद्वेगवंतं कमपि निशि सरः कीदृशं कास्ति वक्रे वक्ता निंद्यः कया स्यात्परिष
दि नियतं मंदसंबोधने किं

न वियोगिनोपि दुःखिता भवंतीति भावः वक्त्रे मुखे कास्तिष्ठति। प्रत्युत्तरं। ला ला। मुखजललावः। वक्ता॰ वाग्मी॰ परिषदि स
भायां कया निंद्यः स्यात्। प्रत्युत्तरं। अपवाचा। अप्रयुक्तभाषया। नियतं निश्चितं मंदस्य अलसस्य संबोधनं किं। प्रत्युत्तरं। अ
लस। हे मंद

रामः
४३

वर्णोपांत्यं· वर्णानां· कादि व्यंजनानां· उपांत्यं· उपसमीपे अंत्यः व्यं कारो यस्य तादृशं वर्णं· कंप्राहु बुधा इति शेषः। प्रत्युत्तरं। हु कारं॥ असुररिपुरणाविष्णु नानंद गोपालये· नंद नाम्नो गोपालस्य आलये गृहे किं॥ प्रस्तं ग्रिसं। प्रत्युत्तरं। अनः। शकटं। प्रणोप्सगः॥ कं क्रिवत्लेयस्य सप्ताणां कथं दृः॥ द

वर्णोपांत्यं कमाहुः किमसुररिपुरणानंद गोपालये स्तंकः प्राले
यादिपुत्रीकुचकलशानुलिप्तालिरेणां कमोलिः॥ ५॥

णां को मौलौ मस्तके यस्य सः एणांकमौलिश्चंद्रशेखरः कः। प्रत्युत्तरं। हरः शिवः। कीदृशः। प्रालेयाद्रेर्हिमगिरेः पुत्री पार्व
ती तस्याः कुचावेव कलशौ। तत्र लुंठ लोपा रविक्रिये यस्य सः। तुषारं तुहिनं हिमं। प्रालेयं मिहिका चेत्यमरः ५

वि·मु·
टी·
४५
44

कीदृगिति। इह संसारे कीदृग्बंधुः कस्य। प्रत्युत्तरं। अशोकः शोकरहितः। तव·भयतः इत्यर्थः। तयांते विलासांते· संश्लेषांते·
वा· कान्ते यसीभर्तुः सुकृतं तपः अपहरत्·हृतवती प्रत्युत्तरं। काली·काली हैमवतीमित्यमरः। तयोर्विलासे संश्लेषे सामी
तोर्ध्यात्रिकस्य चेति विग्रहः। कीदृक्

कीदृक्कस्येह बंधुः सुकृतमपहरेत्प्रेयसी कालयांते कीदृग्भीः॥
स्त्रीविधत्ते धनुरवनिरुहां कं विदामंत्रयस्व॥

धनुः कार्मुकं भीतिं विधत्ते· त्रासं ददाति। प्रत्युत्तरं। नमत्। नमनशीलं। आकर्णमाकृष्टं सदित्यर्थः। अवनौ पृथिव्यां रोहं
तीत्यवनिरुहो वृक्षास्तेषां मध्ये· कंचित्·एकं वृक्षमपि वृद्धं आहूयस्व। प्रत्युत्तरं। तालि। ताली वृक्षविशेषस्तत्संबुद्धौ हे तालि

रामः
४५

दैत्य इति। कं संघ्निष्णाविष्णुना कोदैत्यो निहत इति पृष्टे प्रत्युत्तरं। मधुः। मधुनामा। गद्गदः कः स्यात्। प्रत्युत्तरं। प्रस्वरः। प्रसुरवा
क। हे प्रियतम। कीदृग्वसंतः ऋतुविशेषः। भवतस्तव प्रीतये हर्षाय नित्यमस्तु भवतु। प्रत्युत्तरं। कोकिलोत्सादि संर्व। कोकि
लानां पक्षिविशेषाणामालापेन ६

दैत्यः कं संघ्निषाकः कथय निहतो गद्गदः कः प्रतीतः कीदृक् कीदृग्वसंतः प्रियतम
भवतः प्रीतये नित्यमस्तु ६ कोकिलालापवाचाल सहकारमनोहरः प्रशो।
कस्तवकालीनमत्तालिमधुरस्वरः ७ श्लोकोत्तरजातिः॥

प्राभाषलोनवाचालाब हुगर्हिवाचोये. सहकाराः प्रतिसौरभाम्रा स्तैर्मनोहरः। पुनः कीदृक्. प्रशोकानां वंजुला
नांस्तवके प्वालीना. निर्मर्ज्जिताये मत्तालयोः मत्तभ्रमरास्तेषां मधुरः स्वरो यत्र सः। ७ श्लोकोत्तरजातिः॥

खंडोत्तरजातेराद्यमुदाहरणमाह केति। हरति स्मरणादिनवविधभक्तिभिः पापजालमिति हरिस्तेन का चक्रे। किं कृतमिति पृष्टे प्रत्युत्तरं। कृमुत। का पृथिव्यां मुत् हर्षः। कृपणस्य धीर्बुद्धिर्धने कीदृशीति पृष्टे प्रत्युत्तरं। अवनपरा। रक्षणतत्परा। भुजंगे सर्पे किमस्ति प्रत्युत्तरं। गरं। गरलं। कुंभयो

का चक्रे हरिणा धने कृपणधीः कीदृग्भुजंगेऽस्ति किं
कीदृक्कुंभसमुद्भवस्य जठरं कीदृक्प्रिया सर्ववधूः।

नेरगस्त्यजठरमुदरं। कीदृशं। प्रत्युत्तरं। जितांभः। जितं जीर्णीकृतं समुद्रस्तोयराशेः अंभः पानीयं येन तत्। प्रिया सुर्भर्तृगृहं गंतुकामा वधूः स्नुषा कीदृशी। प्रत्युत्तरं। विहितगमा। विहितमुचितं गमनं यस्याः सा॥

सुकृतीनां पुण्यात्मनां श्लोको यशः कीदृशोभिलषितः। प्रत्युत्तरं। गमकः हृद्य इत्यर्थः। पद्ये यशसि च श्लोकः १ निर्मलं नभः।
निरभ्रमाकाशं। कीदृशं। प्रत्युत्तरं। अकमुक्। कं जलं मुंचतीति कमुक मेघः। न विद्यते कमुक् यत्र तत् २ क्षोणी पृथ्वी मा मत्र
यत्र प्रत्युत्तरं। धरे। हे पृथ्वि। सर्वगं आकाशं किमुदितं।

श्लोकः कीदृगभीप्सितः सुकृतिनां कीदृङ्नभो निर्मलं क्षोणीमा क्व च सर्व
गं किमुदितं रात्रौ सरः कीदृशं ८ कुमुदवनपरागं जितं भो विहित
गमा गम कोक मुग्धरेखं ॥

किं प्रोक्तं। प्रत्युत्तरं। खं। व्योम। सर्वगं सलिले व्योम्नि प्रतिबिम्बः। रात्रौ सरः कीदृशं। प्रत्युत्तरं। कुमुदेत्यादि सर्वं। कुमुदवना
नां परागैः कुसुमरजोभिः रंजितं। रक्ती[illegible]कृतं। पत्रिभिः पानीयपतत्रिविहितः कृतो गमागमो गमनागमनं। ये स्तादृशाश्चते को
काश्चक्रवाकास्तेषां मुग्धा मनोहारे रेखा यत्र तत्

खंडोत्तर जातेरुत्तरं तरमाह ॥ वंद्यारुति। वंद्यः विकचः अर्थान्मुंडितमुंडः पृच्छति। मुरारेर्विष्णोः शयनं॰ अर्थात् शयन
स्थानं किं प्रत्युत्तरं। विकच वारि हे विकच॰ हे केशहीन॰ वारि॰ जलं। नरणां रूपं का हरति॰ प्रत्युत्तरं। जरा॥ वार्द्धकं। वीरज
नः कीदृशः॥ प्रत्युत्तरं॥ आजि समुत्॥ आजौ युद्धे समुत्

वंद्यः पृच्छति किं मुरारिशयनं का हंति रूपं नरणां कीदृग्वी॥
रजनश्च कोतिगहनः संबोधयावंचितं॥

सहर्षः। अतिगहनो॰ दुर्ज्ञेयः कः। प्रत्युत्तरं। भवः। शिवः। यद्वा। अतिगहनो दुस्तरः कः। प्रत्युत्तरं। भवः संसारः। अवंचि
तं॰ वंचना रहितं संबोधय। प्रत्युत्तरं। अच्छलित। हे अवंचित॥ ७४

जगतो विश्वस्य धात्री उपमाता का। प्रत्युत्तरं। भूः पृथ्वी। रहस्यते वधूः स्त्री॰ कीदृशी। प्रत्युत्तरं। दूःपरा। कामपरा। कविः छ्कः आदृतः सत्पूरुः। प्रत्युत्तरं। गविः वाण्यां। अर्थैः कः इति पृष्टे॰ प्रत्युत्तरं। रः॥ विभ वः। अर्थैर्विभवाश्रपीत्यमरः। भवता रिपुकुलं॰ वैरिवृंदं किं कृतमिति पृष्टे प्रत्युत्तरं। जितं निर्जितं।

काधात्री जगतो रहस्यति वधूः कीदृक्कविः कादृतः कोर्थैः किं भवता कृतं रिपुकुलं कीदृक्कारो वासरे। ८। विकचवारिजराजि समुद्भवोच्छलितभूरिपरागविराजितं॥ ॥ खंडोत्तरजातिः॥

वासरे दिवसे स्मरः कीदृशं। प्रत्युत्तरं विकचेत्यादि सर्वं विकचानि प्रफुल्लानि च तानि वारिजानि पद्मानि॰ तेषां राजी पंक्तिः तस्याः सकाशात्समुद्भवाः समुत्पन्नाः॰ उच्छलिता ऊर्द्ध्वं नीतास्तथैव भूरि परागाः माज्यपुष्परजांसि॰ तैर्विराजितं शोभितं। ... ॥ ॥

पादोत्तर आनेराद्य मुदाहरणमाह ॥ विभर्त्तीति। इह संसारे सत्वपीडाकरं॰ जंतुं मारणाहरं किं। प्रत्युत्तरं। विषं गरलं। तदे
ववदनेन को विभर्त्ति। प्रत्युत्तरं। अपात्। सर्पः। योषितां॰ स्त्रीणां गलित यौवनं कुलं कीदृशं। प्रत्युत्तरं। अनिन्दि
ह्यते दुः कामो यत्र तत्। हरिरं बुधे रुपरि॰ समुद्रस्योर्ध्वं कां बभार॰ धृतवान्।

विभर्त्ति वदनेन किं क इह सत्वपीडाकरं कुलं भवति कीदृशं गलित यौवनं।
योषितां॥ बभार हरि रंबुधेरुपरि कां च केन स्तुतो हतः क्वयथ कस्त्वया नग
पतेर्भयं कीदृशात् १० विषमपादनिकुंजगताहिताः॥

प्रत्युत्तरं। कुं॰ पृथ्वीं। च पुनः। स हरिः केन स्तुतः। प्रत्युत्तरं। जगता॰ विश्वेन। त्वया को हतः क्वयथेति पृष्टे। प्रत्युत्तरं। अप
हितः शत्रुः। कीदृशात् नगपतेर्हिमवतः सकाशाद्भयमिति। प्रत्युत्तरं विषमेत्यादि सर्वं विषमा उच्चावचा ये पादाः प्रत्यंतपर्व
ताः तेषां निकुंजेषु लतादिपिहितोदरेषु गता प्राप्ता अहयः सर्पाः यत्र स तथा तस्मात् ॥१०॥ ॥ ॥

पादोत्तरजातेरुदाहरणांतरमाह॥ हरिरिति। हरिर्विष्णुः कांवहति। वहप्रापणे। प्रत्युत्तरं। कुं·पृथ्वीं। नवारिषु कास्ति। प्रत्युत्तरं।
भीः। भयं पुनः कंप्रति कागता। प्रत्युत्तरं। अं विष्णुं। ई· लक्ष्मीः। रोगयुक्तः कंपत्नुपति। प्रत्युत्तरं। इनं· सूर्यं। धनयुक्तानग
रीकीदृशी। प्रत्युत्तरं। अकरा· बलिरहिता। बलिहस्तांयावः करादत्तमरः। हरिः कं अधारत· धनवान्। प्रत्युत्तरं। अ
गंशोलं। बलिप्रभृतयोराजानः धरां पृथ्वीं किं अधुः किंकृतवंतः प्रत्यु· अदुः। दत्तवंतः।

हरिर्वहतिकां तथा त्वयिषु का गता कंच काकमर्त्यं पतिरोगवान् धनवतीपुरीकी
दृशी हरिः कमधरद्बलिप्रभृतयोधरां किंअधुः कयासदसि कस्त्वयाव जितो
बुधिः कीदृशाः। ११। कुंभीरमीनमकरागमदुर्गवारिः। । पादोत्तरजातिः। ।

त्वयासद्सिसभायां· कया· कोजितः। प्रत्युत्तरं। गवा·वाण्या· अरिः शत्रुः। अंबू·निधीयंते स्मिन्निति तं बुधिः समुद्रः कीदृ
शा इति पृष्टे प्रत्युत्तरं। कुंभीरमीनमकरागमदुर्गवारिः। कुंभीराश्च मीनाश्च मकराश्च कुंभीरमीनमकराजलचरविशेषास्ते
षामागमः आगमनं· तेन दुर्गमं वारिजलं यस्य सः। ११। पादोत्तरजातिः। ।

चक्रप्रश्नस्य लक्षणमाह ॥ चत्वारीति । पादाभ्यां श्लोकस्य पूर्वार्द्धे स्थितानि चत्वारि अक्षराणि कीलानि पूरयित्वा पादद्वयेन श्लोकोत्तरार्द्धे नेमिं चक्रान्तं पूरयित्वा · दक्षिणावर्तं लिखितं भवति · तच्चक्रप्रश्नमेव हि · जानीहि · नेमस्य कोणात् । लिखन क्रमस्तु । स नाभिचक्रं · लिखित्वा तन्नाभिमध्ये · प्रथमाक्षरं विन्यस्य · त्रिभिरक्षरैः प्राक्कीलं पूरयित्वा नाभिस्थमेव पंचमाक्षरं कृत्वा · त्रिभिरक्षरैः दक्षिणकीलं

चक्रं बंध



चत्वार्यं राशि पादाभ्यां नेमिं पादद्वयेन च ॥ लिखितं
दक्षिणावर्तं चक्रप्रश्नमेव हि मे ॥ १२ ॥

पूरयित्वा · नाभिस्थमेव नवमाक्षरं कृत्वा · ततस्त्रिभिरक्षरैः पश्चात्कीलं पूरयित्वा · नाभिस्थमेव त्रयोदशमाक्षरं कृत्वा · त्रिभिरक्षरैरुत्तरकीलं पूरयित्वा · तदारभ्याक्षरत्रयं त्रयं नेमिचतुष्कोणेषु दक्षिणावर्तक्रमेण लिखिते सति चक्रबंधः सिद्धो भवति ॥ १२ ॥ ॥ ॥

चक्रप्रश्नस्योदाहरणं दर्शयन्नाह ॥ १३ ॥ किमिति। अनघः अपापो भूपतिः चोरस्य किं छिनत्तीति पृष्टे प्रत्युत्तरं· करं हस्तं। अ
नघो॰ पापरहितः योसौ धराशिः किं परं· कुत्सां निंदां वक्ति। प्रत्युत्तरं कु· इत्यव्ययं। कुत्सा निंदा च गर्हणा इत्यमरः। द्रोणयाः
संबोधनं किं। प्रत्युत्तरं· को· हे पृथ्वी। कमलभूर्ब्रह्मा वदति। विश्वं का बिभर्त्ति· प्रत्युत्तरं· क· कुः। हे क· ब्रह्मन्· कुः पृथ्वी।
चक्रांगस्य· कीलस्यामंत्रणं किं। प्रत्युत्तरं। अरः हे कील। सुजनः किं अनार्यम सत्कृत्यं कथमपि· कदापि न कुर्यात्· प्रत्यु

किं चोरस्य छिनत्ति क्षितिपतिरनघः किं परं वक्ति कुत्सां द्रोणी संबोधनं किं वदति कमल
भूः का च विश्वं बिभर्त्ति। चक्रांगामंत्रणं किं कथमपि सुजनः किं न कुर्यादनार्यं भोक्तुः की-
दृक्पुरं स्यात्स्वयमिह वदकुतो मीनपंक्तिर्बिभेति १३॥

त्तरं। कलहं वाग्वादं। भोक्तुः भोग्यकर्तुः राज्ञः पुरं नगरं कीदृग्भवति। प्रत्युत्तरं· सकरं· बलिसहितं। पयसि जले मीनपंक्तिः म
त्स्यश्रेणी· कुतः कस्मात् बिभेति· त्रसति· इति पृष्टे प्रत्युत्तरं। वितः विः पक्षी तस्मात्। सार्वविभक्तिक स्तसिः ॥ १३॥ ॥

कि भिन्नि। शारदं शरत्कालीनं स्वच्छं निर्मलं किं। प्रत्युत्तरं। सरः वर्षे शगतिर्गमनं यस्य स वृषगतिः शिवो वदति। अंशुमाली
कः इति प्रश्ने प्रत्युत्तरं। अजकः १ हे अज शिव कः सूर्यः। अजा विसुहरश्छागा इत्यमरः। को ब्रह्मात्मनि लार्के षि तिच्कोव
रकोषः। पवित्रः कः प्रत्युत्तरं। अमलः। अकल्मषः।

किं स्वच्छं शारदं स्वाच्छ इति वृषगतिः कोंशुमाली पवित्रः को
ऽस्मिन्किं जीवितं का विरचयति कविर्वह्निसंबोधनं किं ॥

अस्मिन् लोके जीवनं किं। प्रत्युत्तरं। ऋत। ऋद्यते भुज्यत इत्यत भोजनं। अङ्गोजने कविः काविरचयति। प्र
त्युत्तरं। गाः वाणी। वह्नेर्नामानस्य संबोधनं किं। प्रत्युत्तरं र हे र हे अग्ने। र पावके च तीक्ष्णे चेति विश्वः ॥

नेति। स्निग्धपः कं नाकांक्षंति। प्रत्युत्तरं। नीरसं। रसरहितं। निर्वीर्यं वा। यं गायादौ रसे वीर्ये देहधातवंबुपारद इति विश्वः। असुररिपो विश्लोस्तनुः कीदृशी। प्रत्युत्तरं। सन्नमा। सक्ता संगमामासाह्वर्जीर्ये स्यांसा मूकः कः। प्रत्युत्तरं। अरतः अथावः। वा विमूक इत्यमरः। हे प्रियतम। वल्लभ। कीदृशास्तडागस्तेतव सम्यक्प्रीतिं तनुते। विस्तारयति। प्रत्युत्तरं करंकु कोकेत्यादि सर्वं। करंकरश्च

नाकांक्षंति स्निग्धपः कं ननु रसुररिपोः कीदृशी कश्च मूकः सम्यक्प्रीतिं तडागः प्रियतम तनुते कीदृशाः कीदृशास्ते। १४ करं कुकोककुररकलहंसकरंबितः। सरोजकोमलोद्गारनीरसे सन्नमारुतः। १५ चक्रप्रश्नजातिः॥ ९॥

कुररश्च करं कुकोककुररकलहंसाः पक्षिविशेषास्तैः करंबितः संपृक्तः। करंबः करवः आरः संपृक्तः खचितः समाहितः इति हलायुधः। करंबश्च करंबितः। पुनः कीदृशः सरोजानां कमलानां कोमलोद्गारे यत्र नीरे। तेन संसक्तो मंदीभूतो वायुर्यस्मिन्सः एतेन वायोस्त्रैविध्यमर्कं भवति। १४ करमिति श्लोको व्याख्यात एव। १५। चक्रप्रश्नजातिः॥

वि·मु·
टी·
५०
50

पद्मप्रश्नस्य लक्षणमाह॥ वर्णेति। वर्णयोः स्वरयोर्द्वयेन द्वयेन पत्रमेकैकं पत्र पृथक्कृतदलं तदन्तर्दलाष्टकं ॥
॥अष्टमिदं दलैर्युक्तमित्यर्थः। सर्वैस्तत्राद्यवर्णेन· सर्वेषामुत्तराणां माद्यवर्णेन प्रथमाक्षरेण· कृतकर्णिकं· कृ
ताकर्णिका बीजकोशो· यत्र तत्पद्मप्रश्नमिति। तद्यथा। ॥



।वर्णद्वयद्वयैकैकदलमन्तर्दलाष्टकं। सर्वै।
।तत्राद्यवर्णेन पद्मं स्यात्कृतकर्णिकं १६।

॥अष्टदलं विरचय्य· तत्राष्टदलेषु· वर्णद्वयं वर्णद्वयं लिखित्वा· कर्णिकायां· आदि
मं वर्णं लिखित्वा पद्मं स्यात्।अलयः अपरपन्।अरपः।अरे।अवंधः।अहस्तः॥अगज।अहीनः।इति पद्ममाला·

एम:
५०

पद्मप्रश्नस्योदाहरणं द्वाभ्यामाह ।। पुण्यालेति । सुकृती कीदृशः वदेति पृष्टे प्रत्युत्तरं । अलपः । अः विष्णुः तस्मिन् ल
यो ध्यानं यस्य सः । कमलैः हर्षिताः के प्रत्युत्तरं तदेव । अलपः भृंगाः त्वद्वैरी कीदृशः प्रत्युत्तरं । अपलपन् । अपगतं शी
घ्रायणं अत भोजनं च यस्य सः निद्राहाररहित इत्यर्थः । गतचक्षुषः पतत्रेणसाकुलं कीदृक् प्रत्युत्तरं । अपलपत ।।
अनीदृशास्मिस्तस्मिन् सर्पः त्वयाके जिताः प्रत्युः आरवः १ प्रत्रवः ।।

पुण्यात्मा वद कीदृशः सरसिजैः के मोदिताः कीदृशस्त्वद्वैरी गतचक्षुषः कुल
मभूत् कीदृक् त्वया के जिताः वकुलिः सलिलाशयः कथय भोः कीदृक् आक्षेप
वाक् स्याद्धः कुत्र न तस्करादिकभयं दत्ते भवत्यायपः ।। २७ ।।

वकुलिः वकुसेतुः सलिलाशयो जलाधारः कीदृगिति पृष्टे प्रत्युत्तरं । अरयः वेगरहिताः । आलिः पंक्तौ च सख्यां च से
तौ च पारिकीर्तित इति विश्वः जलाशयो जलाधार इत्यमरः । आक्षेपवाक् स्यात् कुत्सितशब्दः कः प्रत्युत्तरं । अरे । इति
स्वरूपं । कस्मिन् दत्ते सति प्रायशो बाहुल्येन तस्करादिकभयं न भवेत् प्रत्युत्तरं । अररे कपाटे । कपाटमररं तुल्ये इत्य

वि॰मु
टी॰
५१
51

अपित्तमिति। गविजले॰ अपित्तमपि नः कीदृशं प्रत्युत्तरं। अबंधः। आपो जलानि धीयंते यस्मिन् स अबंधिः समुद्रः। बडवानलः सर्पः। मुक्तो मुमुक्षुः पुमान् कीदृशः प्रत्युत्तरं। अबंधः बंधरहितः कौशिकाउलूकाः कस्माद्बिभ्यति त्रसंति प्रत्युत्तरं। अहस्तः। अह्नि दिनं तस्मात्। विश्वामित्रेच कौशिकोलूकयोरपि कौशिकः इति विश्वः। त्वयात्र स्करः कीदृक्कृतः प्रत्युत्तरं। अहस्तः हस्तरहितः बहुमतो बहुमतो हस्ती कीदृशः। प्रत्युत्तरं। अगजः शैलोत्पन्नः।

अपित्तं गवि कीदृशं निगदितो मुक्तः पुमान्कीदृशः कस्माद्बिभ्यति कौशिका
मुविकृतः कीदृक्त्वयात्र स्करः। हस्ती स्मान्तनुकीदृशो बहुमतः शोच्यो रणः
कीदृशः कीदृक्षः पुरुषः पराप्रतिहतः कीदृग्भवेद्वासुकिः। १८। अलपः। अ
पशयलं। अरवः। अरे। अबंधः। अहस्तः। अगजोऽप्रहीनः॥ इति पद्यबंधः॥

रणः कीदृशः शोच्यः प्रत्युत्तरं। अगजः गजरहितः। परेशाप्रतिहतः अप्रतिहतः अपराभूतः पुरुषः कीदृक्षः इति पृष्टे।
प्रत्युत्तरं। अहीनः पूर्णबलः। वासुकिः कीदृश इति पृष्टे प्रत्युत्तरं तदेव। अहीन इति। अहीनां सर्पाणां इनः स्वामी १८ [illegible]

१५१

काकपदगोमूत्रीजात्योर्लक्षणमाहैकेन ॥ काकस्येति। यस्मिन् श्लोके काकस्येव कोष्ठः। यथा काकस्य तथात्रास्त्रं त्रिकोणं पदं भवति तत्काकपदसंज्ञं ज्ञेयं। तिर्यक् अन्योन्यगु क्राभिः रेखाभिः द्विपद्या द्वयेकृते गो

काकस्येव पदं त्र्यस्रं यत्र तत्काकपदं मतं। तिर्यगन्योन्यरेखाभिर्गोमूत्री द्विपदी द्वये १८

मूत्रीजातिर्ज्ञेया स्पष्टः। १८। लिखनक्रमस्तु द्वयोः प्रदर्श्यते

काकपदमिदं



गोमूत्रिकाजातिरियं



वि॰मु॰
टी॰
५२
52

काकपदजाते रुद्राह्वयलामेकेनाह ॥ कुत इति ॥ हे विषवैद्य स्फुटं कथय। कुतः कस्मात् कारणात् कः पुमान् कीदृग्भवति। प्रत्युत्तरं
। नागदरतः। नागस्याहेर्दरत्वस्त्रासतः। ना पुमान्॰ अगदरतः औषधरतो भवति। दरस्त्रास इत्यमरः॥ अगदो जायुरि
ति च। कः पुमान् कीदृक्षः सन्॰ रिपोर्वशगामी भवति। प्रत्युत्तरं नागतनयः। ना पुमान्॰ गतनयः गततनयः नीतिरहितः।
च पुनः कलभः कः। प्रत्युत्तरं। नागतनयः हस्तितनयः। कलभः॥

कुतः कः स्यात्कीदृक्कथय विषवैद्य स्फुटमिदं रिपोः कः कीदृक्षो भवति वशगः कश्च
कलभः प्रवीणाः संबोध्य सुभग वद को रत्नवचनो सुरूपेति रम्या लिं जगति महती
कागतवती २० नागदरतः। नागतनयः। नागरमणी। इति काकपदजातिः

तिः पावतः। कलभः करिशावक इति। प्रवीणोऽभिज्ञः संबोध्य प्रत्यु॰ नागर हे अभिज्ञ रत्नवचनो कः॰ प्रत्यु॰ मणी॰ रत्ने।
रत्नं मणिर्द्वयोरश्मजातौ विलमरः। सुरूपे यमिति महती रम्या लिं जगति का गतवती॰ प्रत्युत्तरं॰ नागरमणी॰ नागपत्नी। २०॥

॥ इति काकपदश्लोकः ॥

राम:
५२

भागुक्तलक्षणाया गोमूत्रीजातेरुदाहरणमाहद्वाभ्यां। कामिति। युवतीं कामाहुरिति पृष्टे प्रत्युत्तरं। अजरां। जरारहितां। अमंगलवती कीदृक्‌ प्रत्युत्तरं। अशुभा। अमंगला। ग्रहाणां गतिः संबोध्या। प्रत्युत्तरं। वारः हे ग्रहगते। यद्वा। अमंगलवती ग्रहाणां सूर्यादीनां गतिः कीदृक्त्वं बाध्येतेकः प्रश्नः १ तत्र

कामाहुर्युवतीममंगलवती कीदृग्ग्रहाणां गतिः
संबोध्या वत मत्स्यवेधनधरः कीदृग्भवेत्पामरः॥

प्रत्युत्तरं। अशुभाचारः। अशुभा अमंगलवती गतिश्चारः अशुभा चारस्तस्य संबोधनं हे अशुभाचार। चारः क्रिया ल बक्रोस्यादुक्तो जंघापसर्पयोरिति विश्वः। वत सामंत्रणे। मत्स्यवेधनधरः पामरो नीचो जनः कीदृग्भवेत्। प्रत्युत्तरं। बली

शी बलिशं मत्स्यवेधनमित्यमरः।
इत्येकादशमपि॥

विमु॰टी॰

५२

53

वल्मीकस्यापत्यं वाल्मीकिः॰ तस्य वेश्म गृहं वाल्मीकिवेश्म॰ कीदृगिति पृष्टे॰ प्रत्युत्तरं। लवि। लवः सीता तनयो विद्यते
यस्मिंस्तत् वाल्मीकेरपि च वल्मीकि इति शब्दभेदाद्वाल्मिकिरिति रूपमध्योपि। अस्तनमकुचं उरस्थलं कोधत्ते॰
प्रत्युत्तरं नापुमान्। सुरैर्गीर्वाणी कीदृशी उच्यते। प्रत्युत्तरं। उदिता॰ संस्कृता वाक्। उदयशीलावा। योषितः कदापि शं
खरहितं॰ शंखो नखी सुगंधिद्रव्यं तेन रहितं। यद्वा॰ कस्मिंश्चिद्देशे

कीदृग्वाल्मीकिवेश्म कोस्तनमुरो धत्ते सुरैरुच्यते गीः
कीदृक् कदापि शंखरहितं वांछन्ति कं योषितः॥ २१॥

शंखनिर्मितवलयादिरहितं तं नु वैधव्यचिह्नं। तस्मात्तेन रहितं॰ कं न वांछन्ति। प्रत्युत्तरं। भुजं॰ बाहुं। शंखो निध्यंतरे कं
बुललाटास्थिनखीषु चेत्तिविश्वः। यद्वा॰ शंखरहितं॰ शंखयवादिचिह्नरहितं स्त्रियः कं न वांछन्ति। प्रत्युत्तरं। भुजं॰ पाणिं

एमः
५२

कीदृगिति पांथानां पथिकानां कुलं॰ पांथकुलं कीदृगिति पृष्टे॰ प्रत्युत्तरं॰ गमनि॰ गमनं॰ गतागतं विद्यते यस्मीस्तत्। नमस्ति
मिरं काहरति। प्रत्युत्तरं॰ भा॰ दीप्तिः चक्रस्य रथांगस्य संबोधनं किं॰ प्रत्युत्तरं। साार॰ अरैः कीलैः सहितः सारः तत्संबोधनं
सार॰ हेचक्रांग। चंपकशाखिनां॰ चंपकवृक्षाणां रम्या मनोज्ञा का।

कीदृक् पांथकुलं नमो हरति का किं चक्र संबोधनं।
रम्या चंपकशाखिनां कथय का कस्मात् जेर्षभवेत्


प्रत्युत्तरं। कलिका। कोरकं। कोरकोः स्त्री कुड्मले पीतिमेदिनी। च पुनरर्थे। आहृजर्षे॰ आटच् इत्यस्यार्थकः प्रत्ययो भ
वेत्। प्रत्युत्तरं। आलच् इति। आलमाह जोवह भाषिणी वाचालच ॥ ८५॥ ॥ ॥

बलिवैरिणा विष्णुना किंच्छिन्नं। प्रत्युत्तरं। अनङ्ग शरीरं। मुरारेः का द्वाका। प्रत्युत्तरं। अ· देवा वासुदेव। अकारो वासुदेवः स्यादित्ये
कार्थ्यरकोषः। श्मसाने· का ऽस्ति। प्रत्युत्तरं। चिता। मृतकशय्या। द्वा· पृथ्वी पूर्वं कीदृग्भवतिस्म। अधुना पुनः कीदृग्व
र्त्तते। प्रत्युत्तरं॥ अजरामेत्यादि सर्वं। अजश्च रामश्च अजरामौ

किं छिन्नं बलिवैरिणा मुररिपोः का द्वाश्मशाने ऽस्ति का द्वा कीदृ
ग्भवति स्म पूर्वमधुना कीदृक् पुनर्वर्त्तते। २२ अजरामशुभाचारव
लिशीलविनोदिता॥ भुजङ्गमनिभाः सारकलिकालेजनोचिता
२३ गोमूत्रिकाजातिः

एजानौ· तयोः शुभाचारेण· बलिराज्ञः शीलेन च विनोदिता पूर्वमासीत्· अधुना पुनः भुजंगमनिभाः सर्पवत्क्रूर·
असाराः निःसत्वाये· कलिकालेजनाः· तेषामुचिता वर्त्तते २३॥ गोमूत्रिका जातिः ॥ ॥ ॥

सर्वतोभद्रं नामेतेषां लक्षणमाह एकेन वर्णेनेति। यस्मिन्श्लोके एकेन वर्णेन द्वाभ्यां वर्णाभ्यां वा· सर्वैस्त्रिभिर्वा· सर्वदिग्गतै
रनुलोमप्रति॰लोमादिभिः सर्वप्रकारैः स्वरैरक्षरैः कृत्वा · सर्वतोभद्रं



। वर्णेनैकेन च द्वाभ्यां सर्वैर्वा सर्वदि।
। ग्गतैः॥ अक्षरैः सर्वतोभद्रं दुष्करं।
। तदिदं यथा ॥ २५ ॥ ७० ॥ ॥

दुष्करं· कर्तुमशक्यं सर्वतोभद्रसंज्ञं तदिदं यथा प्रवक्ष्यामि


वि॰मुद्री॰
५५
55

६

सर्वतोभद्रजातेरुदाहरणमाहद्वाभ्यां ॥ ॥कइति। त्यागेधातुः कः प्रत्युत्तरं। हा॰। ओंहाक्त्यागे। नवशत्रुहृदयेका॰ प्रत्युत्तरं॰ आरा॰ नर्मभेदिका। स्तनानां भूषणं के॰ प्रत्युत्तरं॰ हाराः मुक्तावल्यर्थः हारोमुक्तावलीत्यमरः। दुखीकः। प्रत्युत्तरं॰ हारवी। हाइति रवोनादोयस्मिन्सः। कः शब्दः श्रूयते कोकं वृत्ति। प्रत्युत्तरं। हाइति। हा विषाद शुगार्तिषु इत्यमरः। कौ॰ रिपूख्यातवीर्यौ॰ प्रसिद्धपराक्रमौ। प्रत्युत्तरं। वी॰ इश्व

ना वदति

कस्त्यागे धातुरत्र कः स्त्रवरिपुहृदिका भूषणं के स्तनानां को दुःखी कस्य नादो वदत्यु च को रिपूख्यातवीर्यौ ॥ शृंगारी कीदृशः कारणाशिरसि भयाद्भंगमाप्नोति सेना कीदानाद्यभिधायी शिरसि कौ युध्यतः संग्रहस्त ॥२५। ॥ ॥



शिरसि २

उभ्रवि। सौवी। हरकामाविरुपर्थः। उकारः शंकरे प्रोक्त इति। शृंगारशीलः कीदृशः। प्रत्यु॰ हावी॰ हावः शृंगारभावजो विलासो विद्यते यस्मिन्सः। रणाः शिरसिरणाग्रेका सेनाभंगमाप्नोति॰ प्रत्यु॰ अवीरा॰ वीररहिता। दानार्थाभिधायी कः प्रत्यु॰ रा॰। रादानेधातुः। शिरसिशिरसि संप्रहस्त॰ संग्रहणं कृत्वा कौ युध्यतः। प्रत्युत्तरं। अवी। अविश्च अविश्च अ

रामः
५५

कीदृशिति। तोयार्थिनी स्त्री कीदृक्. प्रत्यु. अवीरा. अप्सु पानीये वीरा सहायस्याः सा दुराढ्यो मदकरः गर्वेत्याह.
कः कः। प्रत्यु. रा. विभवः उडुपतिर्नक्षत्रेशः कस्मिन्नंदायते. शिखिंतायते। प्रत्यु. राहो. ग्रहविशेषे। मुरारेः प्रेयसी
का। प्रत्यु. ईलक्ष्मी. दुहिता सुरभिदो प्रेत्स विरम्यो वा हन्तौ कौ. प्रत्यु. वी. विश्व विश्व वी. पक्षिणौ. हंसगरुडौ। खा
खेटको धीवरस्तस्य स्त्री कीदृशी. प्रत्यु. वीहा। विषु पक्षि वीहायस्याः

कीदृक्तोयार्थिनी स्त्री भवति मदकरः प्रायशः को दुराढ्यो कस्मिन्नंदायते सोनियत
मुडुपतिः प्रेयसी का मुरारेः। विरम्यौ तौ वा हन्तौ को दुहिता सुरभिदो कीदृशा खेटक
स्त्री कीदृक् वा चिराभा समितिगतिभयाः के गतौ कश्च धातुः ॥२६॥ हारावी ॥ इ
ति सर्वतोभद्रजातिः ॥

सा। अचिराभा. विद्युत्कीदृक्. नेव भवेदेव। प्रत्युत्तरं। वीरा. विगता इरा. जलं यस्याः सकाशात्सा जलरहिता न भवेदेव
व। इरा भूवाक्सुरा प्सु स्यादिति। समिति संग्रामे. गतभया निर्भयाः के. प्रत्यु. वीराः योद्धुं समर्थाः। गतो धातुष्कः प्रत्युत्तरं। वी.

गतप्रत्यागतजातेर्लक्षणमाह॥ प्रतिलोमेति। प्रतिलोमस्य अनुलोमस्य प्रतिलोमानुलोमौ· ताभ्यां कृत्वा· मध्यमवर्णस्य विलोपेनोत्तरेणाच कृत्वा· गतागतसंज्ञं ज्ञेय। तद्गतागतसंज्ञकमनेकप्रकारकं नानाविधं भवति इत्यर्थः। प्रतिलोमानुलोमाभ्यामिति वस्तुनिर्देशार्थमुक्तं न तु कर्मदर्शनार्थमिति।२७।

प्रतिलोमानुलोमाभ्यामुत्तरे स्याद्गतागतं मध्यवर्णविलोपेन तच्चानेकप्रकारकं २७ वद वल्लभ सर्वत्र साधुर्भवति कीदृशः। गोविंदेनानसि क्षिप्ते नंदवेश्मनि काभवत् २८॥ क्षीरनदी॥

अस्योदाहरणं पंचभिराह॥ ॥वदेति। काचन नायिका भर्तारं पृच्छति। हे वल्लभ· सर्वत्र साधुः कीदृशो भवति· प्रत्युत्तरं दीनरक्षी· दीनरक्षापुरुषः गोविंदेन· अनसि शकटे क्षिप्ते सति नंदगोपगृहे· काऽभवत्। प्रतिलोमेन प्रत्युत्तरं क्षीरनदी· पयसो नदी॥ २८॥

गतमस्यागतजातेरुदाहरणं तस्मात् ॥ यत्नादिति १ लेखकैर्लेखकैर्यत्नः यत्नादन्विष्य यत्नपूर्वकमन्वेषणं कृत्वा । मसिमल्लिका । का । ग्राह्या । प्रत्युत्तरं । नालिकेरजा । नालिकेरकाष्ठोत्पन्ना लिपिंकरोत्तरचलोत्तरं चंचुष्व लेखकः । त्वमरः । बंधकी । पुंश्चलीघनांधकारेनिविडांधकारे । पक्ष । घनोमेघ

यत्नादन्विष्य काग्राह्या लेखकैर्मसिमल्लिका ॥ घनांधकारे
निशि कं मोदते केन बंधकी ॥ २९ । नालिकेरजा ॥ ॥

त्तस्यांधकारे । निःशंकं । शंकारहितं यथा स्यात्तथा केन मोदते । मुदिता भवति । प्रत्युत्तरं । जारकेलिना । जारस्योप
पतेः केलिना । क्रीडया । जारस्तूपपतिः समाविति त्वमरः । द्रवकेलिपरीहासाः क्रीडा लीला च नर्म चेति च । पुंश्चली स्या ।

वि॰स्तुटी॰
५७
57

उदाहरणांतरमाह ॥ असुरेति । दैत्यदेवराजभिर्मस्तकैः का उह्यते ध्रियते॰ प्रत्युत्तरं॰ मालिका । माला । उज्वलवासंसि॰ अस्थापिका॰ अतिविस्तारमाप्नोति । प्रत्युत्तरं । कालिमा॰ कज्जलं कमलयोनिर्ब्रह्मा पृच्छति । पुष्पं केन सेव्यते । प्रत्युत्तरं अलिः इव्रत्तन॰ अलिना भृंगेन । उत्पलस्य कमलस्य॰ मधुराचमसरसान्निग्धा च॰ मृद्वीकोमला च॰ का भवेत् । प्रत्युत्तरं । नालिका । मृणालदंडः । मसृणोऽकर्कशो स्निग्धश्चेति मेदिनी ३०

असुरसुरनरेंद्रैरुह्यते का शिरोभिस्तनुरपि शुचिवस्त्रे कातिविस्तारमेति ॥ वदति कमलयोनिः सेव्यते केन पुष्पं मधुरमसृणमृद्वी का भवेदुत्पलस्य ।३० मालिका ।
हिमांशुखंडकुटिलोज्वलप्रभं भवेद्वराह प्रवरस्य कीदृशं ॥ विहाय वर्णां पदमध्यसंस्थितं न किं करोत्येव जिनः करोति किं ।३१। दंष्ट्राभं ॥

	ना	
मा	लि	का
	का	

उदाहरणांतरमाह ॥ हिमांशुखंडश्चंद्रखंडवत्कुटिलोज्वलप्रभं वराहश्रेष्ठस्य कीदृशं भवेत् । प्रत्युत्तरं । दंष्ट्राभं । दंतसदृशं । पदमध्यसंस्थितं वर्णं विहाय॰ जिनः सुगतः किं न करोति॰ किं करोत्येव॰ प्रत्युत्तरं । दंभं कपटं न करोति । भद्रं॰ भद्रं करोत्येव । भं

राम:
५७

उदाहरणांतरमाह ॥ वसंतमिति । वसंतकालमासाद्य · कीदृशेन पिकेन कोकिलेन रसालभूरुहस्थेन दृष्ट्वा राजंति दीप्यंते
राजृ दीप्तौ । प्रत्युत्तरं · कांतगिरा । कलरवेण । अस्मिन्नुत्तरे · मध्यमं वर्णद्वयं निरस्य · तवद्विषां · शत्रूणां का । प्रत्युत्तरं । का
रा । बंधनगृहं । अंत्यमा तिथिः पौर्णमासी का · प्रत्युत्तरं । राका । पूर्णो राका निशाकर इत्यमरः ३२ इति गतप्रत्यागतजा
तिः । अथ वर्द्धमानाक्षरजातेर्लक्षणमाह ॥ आदाविति । आदौ मध्ये · अंते वा · एकद्वि आद्यो यत्र वर्णजातयो वर्द्धते · तद्व

वसंतमासाद्य वसेषु कीदृशा पिकेन राजंति रसालभूरुहः । निरस्य वर्णद्वयमत्र मध्यमं तव द्विषां
कांसतमा तिथिरुच्यते का ३२ कान्तगिरा ॥ गतप्रत्यागतजातिः आदौ मध्ये तथांते वा वर्द्धते
वर्णजातयः एकद्वि आद्यो यत्र वर्द्धमानाक्षरं हि तत् ।३३। किमनंतं तथाख्यातं पादेन
भंगमाहुव ॥ जनानां लोचनानंदं केतनं किं घनात्यये ॥३४॥ खंजनाः ॥ ॥ ॥ ॥

र्द्धमानाक्षरसंज्ञकं ॥३३॥ एतदुदाहरणमाह षड्भिः ॥ किमिति । अनंतस्य भावो नंतता · तथा किं ख्यातं · प्रत्युत्तरं । खं · आ
काशं । पादेन भंगं · चरणेन खंजं माहुव । प्रत्युत्तरं । हे खंज । घनात्यये शरत्काले प्रसांहृष्टि सुखं केतनं किं । प्रत्युत्तरं । खंजनाः

॥४८॥ वि॰ मु॰ टी॰

उदाहरणांतरमाह॥ उर इति। पयोधरं विना उरःस्थलं को बिभर्ति प्रत्युत्तरं ना पुमान्। मारुतामानं सर्पं संबोधय। हे नाग। जनाः लोकाः पत्तनसंभवं किं वदंति। पत्तनं। नगरमित्यर्थः। प्रत्युत्तरं। नागरं। गौडवधूकुचस्योपमा यस्मिं स्ताहृशं फलं किं। प्रत्युत्तरं। फलविशेषं। ३५। अपरमाह॥ प्रायेणेति। प्रायेण बाहुल्येन नीचलोकस्य गर्वलां कः करोति। प्रत्युत्तरं। ए। अर्थः। तदादौ वर्णद्वये दत्ते। वनवासिनः के भवंति। प्रत्युत्तरं। शावराः किराताः ३६॥ अन्यदाह॥ सानुज इति। सानुजः सबंधुः

उरस्थलं कोत्र विनापयोधरं बिभर्ति संबोधय मारुताशनं वदंति किं पत्तनसंभवं जनाः
फलं च किं गौडवधूकुचोपमं ३५ नागरं॥ प्रायेणानीचलोकस्य कः करोतीह गर्वतां॥ आ
दौ वर्णद्वये दत्वा ब्रूहि के वनवासिनः ३६॥ शावराः॥ सानुजः काननं गत्वा नैकषेयान् ज
घान कः मध्ये वर्णत्रयं दत्वा रावणाः कीदृशो भवत् ३७। राक्षसोत्तमः॥ ॥ ॥

काननं गत्वा नैकषेयान् राक्षसान् कोजघान हतवान्। प्रत्युत्तरं। रामः दशरथपुत्र कर्बुरो निकषात्मज इत्यमरः तन्म
ध्ये वर्णत्रयं निक्षिप्य रावणाः कीदृशाः। प्रत्युत्तरं। राक्षसोत्तमः राक्षसश्रेष्ठः॥ ३७॥ ॥ ॥ ॥

अभवदाह ॥ धत्त इति ॥ वियोगिनी गंडस्थलवत् पांडुफलानिका धत्ते। प्रत्युत्तरं। लवली। इंदुवारुणीलता इदं ते व
र्णद्वयं दत्वा· सीताकयाहृष्टा अभवत्। प्रत्युत्तरं। लवलीलया लवनाम्नः पुत्रस्य लीलया ॥ ३८॥ विष्णो

धत्ते वियोगिनीगंडस्थलपांडुफलानिका वद वर्णौ विधायांते सीता हृ।
ष्टाकयाभवत् ३८ लवलीलया ॥ विष्णोः कावल्लभा देवी लोकत्रितय।
पाविनी ॥ वर्णमाद्यं तयोर्हृत्वा कः शब्दस्तु सवाग्वदः ३९ ॥ समानः ॥
॥ वर्द्धमानाक्षरजातिः ॥

रिति विष्णोर्वल्लभा का। प्रत्युत्तरं। मा· लक्ष्मी। तदाद्यं तयोरेकैकं वर्णं हृत्वा· तुल्य वाक् समान वाची शब्द· क इति
पृष्टे· प्रत्युत्तरं। समानः। तुल्यः ॥ ३९ ॥ इति वर्द्धमानाक्षरजातिः ॥ ॥ ॥ ॥

किंशुक

हीयमानान्तरजातेर्लक्षणमाह॥ आदित इति॥ सूत्रमेतत् ४० हीयमानान्तरजातेरुदाहरणमाह पंचभिः वसंत मिति। हे वल्लभ॰ वसंतमासाद्यवनेषु काशिम फुल्लितं॰ किंशुकं राजते। प्रत्युत्तरं। किंशुकं। पलाशपुष्पं। किंशुको नाम पलाशस्यान्तस्थे पुंस्त्वकमिति मेदिनी। स्फुटान्तरं प्रश्नकान्तरं विहंगमं

आदितो मध्यतोन्तात्तद्धीयंतेवर्णजातयः। प्रकाल्यादभ्यो यत्र हीयमानान्त-
रंहितत् ४० वसंतमासाद्यविकाशिराजते वनेषु किंवल्लभप्रोत्फुल्लं तां
विहंगमं कंच परिस्फुटान्तरं वदंति कं पंकजसंभवं विदुः॥ ४१ किंशुकं॥

पक्षिणं कं वदंति। प्रत्युत्तरं। शुकं। कीरं। शुको व्याससुते कीरे रावणस्य च मंत्रिणि। ग्रंथपर्णे शिरीषे च इति वि॰
श्वः। पंकजसंभवं पद्मयोनिं कं विदुः। प्रत्युत्तरं। कं॰ ब्रह्माणं। को ब्रह्मात्मानिलार्केषु दिवि लेके कात्तरः॥ ४१॥

रामः
५९

उदाहरणांतरमाह ॥ समुद्यत इति। कस्मिन्समुद्यते यं मूलानुं स्वस्मोन यांति। प्रत्युत्तरं। हिमंकरा चंद्रे। कस्मिन्समुदिते ज
लाद्भयं भवेत्। प्रत्युत्तरं। मकरे नक्रे। जलचरविशेषे इत्यर्थः। कस्मिन्समुद्यते तव शत्रुरपयाति। पलायते। प्रत्युत्तरं। करे हस्ते। क
लो वा। महीगो निकृष्टस्तत्संबोधन वाचि पदं किं। प्रत्युत्तरं के इति नीचामंत्रणे। ४२ ॥ अन्यदाह। तपस्विन इति। वनेषु तपस्वि

॥ समुद्यते कुत्र न यांत्युलाः समुद्यते कुत्र भयं भवेज्जलात्। समुद्यते कुत्र तवापयाति रिपु
र्महीगसंबोधनवाचि किं पदं ४२ हिमकरे। तपस्विनो स्यंन महासुखाशयावनेषु कः
स्मै स्पृहयंति सन्नमा इहाद्यवर्णाद्वितयं निरस्य भोः सदा स्थितं कुत्र च सत्समुन्नतं ४३

॥ तपसे ॥

नः कस्मै स्पृहयंति। प्रत्युत्तरं तपसे। चांद्रायणा[illegible]द्यर्थं तपश्चांद्रायणादौ स्याद्धर्मे लोकोत्तरेपि चेति विश्वः। अस्याद्यवर्ण
द्वयं निरस्य। हित्वा। सम्यक्भावः सत्वं कुत्र स्थितं। प्रत्युत्तरं से। सकार इत्यर्थः ॥ ४३ ॥ ॥ ॥

वि·मु·टी·
६०
60

पुरुष इति प्रायेण सकलाः कलाः चतुःषष्टिसंख्याः कीदृशाः पुरुषो वेत्ति जानाति। प्रत्युत्तरं। नागरिकः। नगरोत्पन्नः मध्यमवर्ण
द्वयं निरस्य सुरालयः स्वर्गः कः प्रत्युत्तरं। नाकः ४४ अथ प्रश्नः यजमानेन स्वर्गहेतुः कः सम्यग्विचार्यते प्रत्युत्तरं। यागवि
धिः। यज्ञविधानं। आद्यंतयोरेकैकं वर्णं विहाय गोलं सास्त्रादिमत्वं कुत्र स्थितं वदेति प्रश्ने प्रत्युत्तरं। गवि। गो ऽत्रौ। ४५ इति
हीयमाना द्वरजातिः अंघ्रबलाबंधनागपाशावो हीयद् एण माह। अथ प्रश्नो नेति। यत्रा नो न्याद्वरवर्तिना· कोर्थः॥

पुरुषः कीदृशो वेत्ति प्रायेण सकलाः कलाः मध्यवर्णद्वयं त्यक्त्वा ब्रूहि कः स्यात् सुरालयः
४४। नागरिकः। यजमानेन कः स्वर्गहेतुः सम्यग्विचार्यते विहायाद्यंतयोर्वर्णौ गो
त्वं कुत्र स्थितं वद ४५॥ यागविधिः॥ हीयमाना द्वरजातिः॥ प्रश्नो नाद्वरवर्तिन्या वै
कांतरितयाथवा। अंघ्रबलाबंधद्युक्तो ग्रंथिमान्नागपाशकः ४६॥ ॥ ॥

प्रथमवर्णस्य द्वितीयेन· द्वितीयस्य तृतीयेन· तृतीयस्य चतुर्थेन। एवं रीत्या· कोष्ठरचनासंबंधः सा जातिः अंघ्रबलेति
। अथवा· एकांतरितया कोर्थः प्रथमस्य तृतीयेन द्वितीयस्य चतुर्थेन· तृतीयस्य पंचमेन वर्णेन संबंधः सा एकांतरित
अंघ्रबला। ग्रंथियुक्तो वर्णसंबंधो नागपाशाख्यो ज्ञेयः ४६

जाः

रामः
६०

तत्रश्रंखला जाते रुद्राहरणमाह द्वाभ्यां ॥ पवित्रमिति। इह लोके। अत्यंतिकृत पवित्रं किं। प्रत्युत्तरं। पयः क्षीरं। भटस्य योध-

स्यामंत्रणं किं योध। हे सुभट। धरणीधरः शैलो ब्रवीति। अजीर्ण संबोधनं किं। धर हे शैल। रसे त्वजीर्ण संबोधनं। आधके

त्यमूलास्युशिति। अहार्यधरपर्वता इत्यमरः। हरिर्वदति मदन वैरिणा शिवेन संयुगे कोजितः प्रत्युत्तरं। समयः। हे

पवित्रमतिशिक्कि मिह किंभटामंत्रणं ब्रवीति धरणीधरस्तु किमजीर्णसंबोध
नं। हरिर्वदति कोजितो मदन वैरिणा संयुगे तनोतिननु कः शिखंडिकुलतांडवाडं
वरं ४७ पयोधरसमयः

सः। लक्ष्मीकः मयः। मय नामा असुरः। ननु निश्चितं शिखंडिकुलस्य मयूरपक्षस्य यत्तांडवं नटनं तत्राडंबरं तूर्यरवं क
स्तनोति। प्रत्युत्तरं। पयोधरसमयः वर्षाकाल इत्यर्थः। तांडवं नटनं नाट्यमित्यमरः। आडंबरस्तूर्यरव इति मेदिनिः ४७

भवतीति। आजौ युद्धे जयिनी जयशीला सेना का। प्रत्युत्तरं। परा। उत्कृष्टा। अधरभूषणं। आहूय। प्रत्युत्तरं। रागः। हे लोहित। रागो-
त्तरः कौमलस्यर्थे लोहितादिष्विति विश्वः। अहिः सर्पः किं वहति। प्रत्युत्तरं। गरं। विषं। क्ष्वेडस्तु गरलं विषमित्यमरः। कुसुंभसमु-
द्भवं। महारजनोद्भवं। पुष्पं कीदृक्। प्रत्युत्तरं। रंजि। रंजनशीलं। कुसुंभं। हेमनि महारजने च कमंडलाविति मेदिनिः। हे वीर

भवति जयिनी कासौ सेना हूयाधरभूषणं वहति किमिरः पुष्पं कीदृ
कुसुंभसमुद्भवं महति समरे वैरी वीर त्वया वद किंकृतः कमलमुकुलेभृं
गः कीदृक्पिबन्मधु राजते ४८ परागरंजितः। शृंखलाजाति ४॥

महति युद्धे त्वया शत्रुः किंकृतः। प्रत्युत्तरं। जितः। कमलस्य मुकुले कुड्मले। भृंगो। मधु। पुष्परसं पिबन् कीदृक् राजते।
प्रत्युत्तरं। परागरंजितः। कुसुमरेणुभिरनुलिप्त इत्यर्थः ४८ इति शृंखलाजातिः ॥ ॥ ॥

प्रकांतरेणं खलाजाते हृदाहरणमाह ॥ आह्वानमिति । कस्यचिदनिर्दिष्टस्य तरोर्वृक्षस्याह्वानं किं प्रत्युत्तरं । नीप· हे कदंब । प्रायो बाहुल्येन परेषामन्येषां कार्यं· केन कुर्वते· इति पृष्टे प्रत्युत्तरं । परे· शबराः पूर्णं चंद्रं का वहति । प्रत्युत्तरं । राका· पौर्णमासी स्नानं च का पृच्छति । किं पृच्छतीत्याह । लोकः

आह्वानं किं भवति हितरोः कस्यचित्पक्षविज्ञैः प्रायः कार्यं किमपि न कलौ कुर्वते के परेषां ॥ पूर्णं चंद्रं वहति ननु का पृच्छति स्नानवस्तुः के नो दन्याजनितमसमं कष्टमाप्नोति लोकः ४८ नीरापकारेण ॥

क्षुदन्या· जनितं· पिपासासंभवं· असमं· विषमं कष्टं केन प्राप्नोति· प्रत्युत्तरं· कारणं· हे स्नान इच्छे· नीरापकारेण । जलस्यापकारेणेत्यर्थः । उदन्या तु पिपासा तृट् तर्ष इत्यमरः ॥४८॥ ॥ ॥


वदाहरणांतरमाह ॥ केति। हे सुभट भवतस्तव संबुद्धिः का। प्रत्युत्तरं। वीर। संप्रवुद्धैर्विहंगैः पक्षिभिः प्रातः वनं कीदृग्भवति। प्र
त्युत्तरं। रवि। रवो ध्वनिर्विद्यते यस्मिंस्तत् लोको मुदं हर्षं कस्मिन् प्रापयति विस्तारयति। प्रत्युत्तरं। हासे· हास्ये· त्वदीयास्त्वत्संबं
धिनी जयित्री जयशीला का भवति इति पृष्टे प्रत्युत्तरं सेनाऽत्वम्·

कासंबुद्धिः सुभट भवतो ब्रूहि पृच्छामि सम्यक्प्रातः कीदृग्भवति विपिनं सं
प्रबुद्धैर्विहंगैः लोकः कस्मिन्प्राप्यते मुदं का त्वदीया जयित्री प्रायो लो
के स्यात्तमिह सुखं जंतुना कीदृशेन ५० । वीहारसेविना ॥ एकांतरितम्

दूरत्त्वो के· प्रायः कीदृशेन जंतुना शरीरिणा सुखं स्थितं। सुखं स्थीयत इत्यर्थः। प्रत्युत्तरं। वीहारसेविना। वीहारं।
वो द्रुतपतनं सेवित इति वीहारसेवी तेन ५० । इति प्रकांतरित मंखला जातिः ॥ ॥ ॥

रामः
६२

इदानीं नागपाशजातेरुदाहरणमाह ॥ गोष्ठीति विदग्धजनवत्यपि चतुरजनयुक्तापि गोष्ठी सभा कीदृक् शोचनीया अप्रश-
स्या भवेत् । प्रत्युत्तरं । कविरहिता । पंडितरहिता । गोष्ठी सभायां संपर्कादृति विश्वः तरणिरश्मिषु सूर्यकिरणेषु सदा कास्ति । प्र-
त्युत्तरं । करता । कराणां किरणानां समूहः करता । गुहेन षा




गोष्ठी विदग्धजनवत्यपि शोचनीया कीदृग्भवेन्न रसितारविमत्सुका सदा-
स्ति दुर्वारदर्पदलितामरनायकापि कीदृक्प्रकारसुरराजचमूरिहे-
न ५१ तारकविरहिता ॥ नागपाशजातिः ॥ ५१

ण्मातुरेण सुरराजचमूर्दैत्यसेना कीदृशी प्रकारि कृता । प्रत्युत्तरं । तारकविरहिता । तारकासुरेण विरहिता कृता । कीदृशी च-
मूः दुःखेन वारयितुं शक्यो दुर्वारः दुर्वारश्चासौ दर्पश्च दुर्वारदर्पस्तेन दलितो मर्दितो ऽमरनायकः पुरंदरो यया सा । अपीत्यवधा-
रणे ५१ ॥

अपरमाह॥ कीदृगिति। परैः शत्रुभिरुपहतः पराजितः क्षितीशो भूपः कीदृग्भवतीति पृष्टे प्रत्युत्तरं। गतनयः। नीतिरहितः। अनुच्चैः
स्वर्वः पृच्छति। इह संसारे विदितं प्रसिद्धं पवित्रं किं प्रत्युत्तरं। गव्यं। हे स्वर्व। गव्यं दुग्धदध्यादि। अरीयोजनकः यस्य पिता। विद्धि
न पाशिचरणो निकृत्तहस्तपादो भवति। स पुमान् पुनः परैः शत्रुभिः कीदृग्भिहतः पराजितो भवति। प्रत्युत्तरं। अंगतनयः। अं

कीदृक्परैरुपहतो भवति क्षितीशः पृच्छत्यनुच्चः इह किं विदितं पवित्रं विद्धि न पाशिचर
णो जनको यदीयः कीदृक्परैरभिहतः स पुमान् पुनः स्यात् ५२ अंगतनयः इति।
नागपाशजातिः॥



गः करचरणहीनः स्तदीयतनयः पुत्रः ॥ ५२॥ इति नागपाशजातिः॥ ॥ ॥ ॥ ॥

चित्रसं पुडुजा सो लक्षिणमाह ॥ भाषाभिरिति। यत्प्रश्नं संस्कृत प्राकृतादिभिर्भाषाभिः संस्कृतभाषया प्राकृतभाषया च चित्रितं
संपृक्तं स्यात्तत्संतत्श्चित्रं चित्रं तत्कं कथयंति। आदिना पैशाची मागधी लौकिकादि ग्रहः। तत्पुनः एकया भाषया उक्तं यत्तत्सं
पुडं संज्ञं वांछन्ति ५३ तत्र संस्कृत प्राकृतजातिं प्रदर्शयन्नाह ॥ किमिति। तादृशस्य विख्यातकीर्तेः महतो महात्मनो जलरा
६ शेरुदधेः किं वस्तु कीदृशं न स्यात्

भाषाभिश्चित्रितं यत्स्यात्संस्कृतप्राकृतादिभिः। संतश्चित्रं तदिच्छंति संपुडं त्वेकभा
षया ५३ किं न स्यात्कीदृक्त्वं महतोपि च तादृशस्य जलराशेः दिनकरकिरणफंस
॥ णपडिउड्डं होइ किं गोसे ५४ कमलवणं ॥

प्रत्युत्तरं। कमलवणं। कं जलं। अलवणामद्वारं न स्यादेव। संस्कृतमुक्त्वा उत्तरार्द्धेण प्राकृतभाषया वदति। दिनकर
किरणस्पर्शेन। पडिउड्डं। प्रतिवुद्धं। होइ। भवति। किं। गोसे। किं प्रभाते। प्रत्युत्तरं। कमलवणं। कमलवनं ५४

उदाहरणांतरमाह ॥ मत्स्येति । मत्स्यानां रहितं अंबुजलं कीदृशं · अवि · न विद्यंते वयः पक्षिणो यत्र तत् । रोगो ध्वास्तीति रोगी · प
द्मति । निशासु रवि विधुः किं भाति । प्रत्युत्तरं । साम · भं · अभीरोग स्तेन सहितः साम सत्सं तु द्यौ · साम · हे सरोग । भंनवत्वं । अ
भीरोगेतद्विशेष इति विश्वः । अनंगः कः प्रत्युत्तरं । इः कामः ॥ मगो वदति । खे · आकाशे · गम्य ई · गम्यते · केरिसा · कीद
शार । इणा · रविणा · प्रत्युत्तरं । एण · हे मग · अविसा

मत्स्यरहितमंबुकीदृक्पद्मति रोगी निशासु विं भाति को ऽनंगो वदति मगः खे
गम्य इ केरिसार इणा ५५ अविसाम भीमरेण । संस्कृतप्राकृतजातिः ॥

मभमिरेण · । अविश्राम भ्रमणशीलेन । विश्रामरहितं यद्भ्रमणं तच्छीलेनेत्यर्थः एणो मृगविशेषः । एणः कुरंग
मौ रिष्य स्याद्दृश्यः श्वा इ लोचन इति त्रिकांडशेषः । अनंत सुरवर्त्मनि खमित्सम मरः ५५ संस्कृतप्राकृतजातिः ॥ ॥ राम:
६४

संस्कृतापभ्रंशजाते स्फुटाहरणमाह ॥ प्राय इति। दंतप्रहीणा अदंतगजाः कीदृशाः हैरिगजाः प्रायो विभ्यति। त्रसंति। प्रत्युत्तरं। सरदात्। रदो दंतस्तेन सह वर्त्तमानात्। कीदृशान्नृपतिना पृथ्वी राजन्वती राजते। प्रत्युत्तरं। अवता। अवनं रक्षणं करोतीत्यवन्। तेन। अवता। सुराष्ट्रे देशे राजन्वानित्यमरः। प्रावृषि वर्षाकाले गिरितटी शैलभूमिः कीदृशी। प्रत्युत्तरं विदवा। दवाग्निरहिता। जले। कः कं धत्ते। प्रत्युत्तरं

प्रायो विभ्यति कीदृशात्करिगजा हं दंतप्रहीणा गजाः पृथ्वी संप्रति कीदृशान्नृपतिना राजन्वती राजते। प्रावृषि कीदृशी गिरितटी धत्ते च कः कं जले मत्स्यो बलिशं घनान्तसमये जातं सरो कीदृशं सरदादवता विदवाहिरं ॥ ॥

अहिः सर्पः। अथार्थश्लेषः। अंबिसं। मत्स्यो बलिशं मध्याह्नवेलायां। घनान्तसमये। घनात्ययदिने। मेघापगमे। जातं। जातं सरः कीदृशं। कीदृशं। प्रत्युत्तरं। सरदादवताविदवाहिरं। शारदातपतापितवाह्यं। शरत्कालीनातपेन तापितं बाह्यं वहि

उदाहरणांतरमाह ॥ कुन्नमिति। कृत्तं छिन्नं अंगं कीदृशं। प्रत्युत्तरं। विस्त्रं दुर्गंधि। विस्त्रं स्यादामगंधिपदित्यमरः। दंतभवं दंत।
स्पर्शजं कं वर्णा वदंति। प्रत्युत्तरं। तं तारकं। लवलसानां दंता इति। अतिलघुवाचि। अतिस्तूका वाचिपदं किं। प्रत्युत्तरं। अणु·
लवलेशाः कणाणावइत्यमरः। केरिसु

कुन्नं कीदृशमंगं दंतभवं कं वदंति विद्वांसः अणिलं।
घुवाचिपदं किं केरिसु सुअणेसु होइ जणो ५७।
विस्त्रंतमणु॥ संस्कृतापभ्रंशजातिः।

कीदृशः। सुअणेसु· सुजनेषु· होइ जणो· भवति जनः। प्रत्युत्तरं। विस्त्रंतमणु। विश्रांतमनाः विश्रांतं सुखितं मनो यस्य
सः। दर्शनादेव साधव इति स्मृते ५७ संस्कृतापभ्रंशजातिः॥

संस्कृतमागधिकजातेरुदाहरणमाह द्वाभ्यां ॥ । किमिति । प्रायः सुखं किमाहुः । प्रत्युत्तरं । शं । शिवं । शं शिवे श्रेयसि प्रोक्तमित्यमरः
। केशविकारं च किमाहुः । प्रत्युत्तरं । अलकं । अलकाश्चूर्णकुन्तलाः इत्यमरः । हरेर्दयिता का । प्रत्युत्तरं । मा । लक्ष्मीं निशि
रात्रौ कथमाभा । कीदृक् दीप्तिः कस्मिन् । प्रत्युत्तरं । अलं । पर्याप्तं । येन स्वे । आभा भाद्युतिरुचिदीप्तिर्द्युतिनामाभिधानः
। अलं भूषणपर्याप्तिशक्तिवाचकमित्यमरः । कोलुप्यति । कोऽसावते । वीरपुलिसानां । वीरपुरुषाणां । प्रत्युत्तरं । श्यामलक

किं सुखमाहुः प्रायः केशविकारं च का हरेर्दयिता । कथमाभा कस्मिन्निशि कोलुप्यति वीर
लिसाणं ॥ ५८ ॥ श्यामलकम्मालंबे कलभः संवेरमसुत इति विख्यातः पृच्छति स्फुटं हरिणः
अहिणावणा अलीरस्सो असाहुणो केण उज्जलर ॥ ५९ ॥ कलभएण संस्कृतमागधिकं

म्मालंबे । समरकर्मारंभः युद्धक्रियारंभः इत्यर्थः ॥ ५८ ॥ । कइति । स्तंबेरमसुतः करिशावकः । कप्रत्युत्तरं । कलभः । इभः स्तंबेरमः पद्मी
त्यमरः । हरिणः स्फुटं पृच्छति । अभिनवनगरी । राज्ञः प्रसादो केन उज्ज्वलो भवति । प्रत्युत्तरं । एण । हे हरिण । कलभएण । करभेन
। करो । बलि । स्तदूपेनेत्यर्थः ॥ ५९ ॥ संस्कृतमागधिकं ॥

संस्कृतपैशाचिकजाते रुद्राहरणमाह द्वाभ्यां ॥ कोपारूणामिति । पूर्वकाष्ठाग्रे पूर्वदिग्ग्रे निष्ठिना तनुर्यस्य· अरुणाग्रसरस्यानु
रूसारथेरर्कस्य· कोपारूणमुपमानपात्रं किं । प्रत्युत्तरं कपिलपणां । वानरमुखं · पत्तं रवरोणमरणां सज्जरस्सरणां पुत्ते दि किं
पविसिरूणानुरंजमर्थं । तुरंगमार्थं सज्जरस्यपुत्रैः किमरणपंप्राप्य चूर्णो नमरणां प्राप्नमिलन्वपः प्रत्युत्तरं । कपिलपणं । कपिलस्य मु
नेर्वनमिसर्पः ६० । कमिति । जलदाः कंप्रीणयंति । प्रत्युत्तरं । चातकं । पक्षिविशेषं । कीदृशं सैन्यं समरसलायते । प्रत्युत्तरं कातरं ।

कोपारुणां किमहरणाग्रसरस्य पूर्वकाष्ठाग्रनिष्ठितनो रूपमानपात्रं पत्तं रवरो
णमरणां सज्जरस्सरणं पुत्ते दि किं पविसिरूणानुरंगमस्य ६० कपिलपणा । कंप्री
णयंति जलदा सैन्यं कीदृक्का लायते समरात् धत्ते शिरोधरा किं रुद्रशिरं के रिसंभोदि
॥६१॥ चातकं कातरकं ॥ संस्कृतपैशाचिकं ।

भीरु । शिरोधरा· किंधत्ते· प्रत्युत्तरं । कं· शिरः । सुखशीर्षजलं कं । रुद्रशिरं कीरि संभोदि । रुद्रशिरः कीदृशं भवति । प्रत्युत्तरं । चातः
कं कातरंकं । जातगंजातरंगं । जातात्मन्मागं गायास्तरंगाय स्मीस्तत ६१ संस्कृतपैशाचिकं ॥ ॥ ॥

संस्कृतलोकिकस्योदाहरणमाह ॥ कइति। वर्णाद्यः। अकारादिचकारांतानां वर्णानामाद्यः प्रथमः कः प्रत्युत्तरं। अः अकारः। जलधिसुता॰ लक्ष्मीः कं। प्रत्युत्तरं। ए॰ अः विष्णुः तस्मिन्। दीर्घादिसंज्ञं वर्णकं प्राहुः प्रत्युत्तरं। एवं। ए ओ ऐ औ॰ एतदात्मकं। असौ बुद्धो जिनः कमजयत्। प्रत्युत्तरं। मारं। मदनं। मारजित् लोकजिज्जिन इत्यमरः। तार्किकैस्तर्कशास्त्रज्ञैः कैः क्रियंते। प्रत्युत्तरं। वादाः विवादाः। विः पक्षी॰ आमंत्र्या संबोध्यः। प्रत्युत्तरं। वेहे पक्षिन्। विदितं प्रसिद्धं हेतुवाचि परं किं। कथय। प्रत्युत्तरं। हि।

कोवर्णाद्यः कः जलधिसुता कं च दीर्घादिसंज्ञं प्राहुर्बुधाः कमजनयदसौ तार्किकैः केक्रि।
यंते। आमंत्र्यो विः कथय विदितं किं परं हेतुवाचि जानाश्चेत्त्वं महद्रमहिला साविवो।
लरकीस ६२ अ एचम्मारम्वादावेहि ॥

हेतावनधारणे॰ इत्यमरः। जानाश्चेत्त्वं महद्रमहिला। जानन्त्वं कर्तुं वांछसि महिला॰ साविवोल्लेरकीस सापि वदति किं। या महिला स्त्री नर्तुमिच्छति सा किं वदति तीत्यन्वयः। प्रत्युत्तरं। अमेचम्मारम्वादावेहि अपेचर्मकाराणां वाद्यध्वं वादित्रमिति शेषः ६२

अस्येवोदाहरणांतरमाह॥ शाद्व इति। पुरुषवचनं कर्कशवाचीशाद्वः कः प्रत्युत्तरं। न इत्यव्ययं। स्मरणेः शंकरस्य॰ कुंडलौ कौ। प्रत्युत्तरं। अही। सर्पौ। हरिरंभोधेः समुद्रात्का॰ उदहरत् उद्धृतवान्। प्रत्युत्तरं। कुं॰ एथ्वीं। वीवधो भारः पृच्छति। विवधो वीवधश्चापि पर्याहारेध भारयोरितिमेदिनी॥ किं पृच्छतीत्याह। हण्डीकुण्डी॰ भाण्डिः॰ वाघरे॰ कीस॰ ग्रम्हार ग्रत्सं। हंडीकुंडीपात्राणि॰ आ

शाद्वः कस्यानुरूपवचनं कुंडलौ कौ स्मरणेः कास्मंभोधे हरिरुद्दहरद्वीवधः पृच्छतीदं॥ हण्डीकुण्डी आणसि वाघरे कीस ग्रम्हार ग्रत्संं जेपुछिह्ला सउणपरिहारु त्तरंकीस देद ६३। नाहीकुम्हार ॥ संस्कृतलौकिकं ॥ चित्रजातिः॥

नयसि नगरे। कथमस्मदर्थं। जेपुछिह्ला॰ स॰ उणा॰ परिहारुत्तरं॰ कीसदेद। पृः(पृ)च्छ्यते॰ सपुनः परिहारोत्तरं कीदृग्ददाति। प्रत्युत्तरं। भार। हवीवध॰ नाहीकुम्हार। नास्तिकुम्भकारः। ६३। संस्कृतलौकिकप्रश्नं॥ ॥ चित्रजातिः॥ ॥ रामः ६७

सुडु प्राकृतस्योदाहरणमाह द्वाभ्यां ॥ क इति। को निवसति स्वच्छंदं गिरिगहनकुंजमध्ये· सुंदरीति संबोधनं। गिरिगहनकुंजम
ध्ये· स्वछंदं को निवसति। प्रत्युत्तरं। सरभसवराहवग्गो शरभाश्च शशाश्च वराहाश्च सारभशशावराहा· तेषां वर्गः समूहः। स
ह अर्जुनेन योद्धुं शिखिगमनः कार्तिकेयः कीदृशो भवति। प्रत्युत्तरं। सरहससवराहवग्गो। सरभसशावराह वा ग्गः।

को निवसइ सच्छंदं सुंदरि गिरिगहनकुंजमज्झम्मि सह
अज्जुणेण जोद्धुं सिहिगमणो केरिसो होइ ।६४। सर
हससवराहवग्गो ॥

सरभसेन· हठेन· क्रोधेन वा· सहिताः सरभसाः येशवराः किराताः तेषामाहवे संग्रामे ·प्रगल्भो मुख्यः ॥ ६४ ॥

द्वितीयोदाहरणमाह ॥ केति। का हरइ मणं पइणो· का हरति मनः पत्युः। गुणगणजोव्वणसल्लाहणिज्जस्स। गुणगणा-
यौवनश्लाघनीयस्य। गुणगणेन० यौवनेन च श्लाघनीयस्य· पूजनीयस्य· पत्युर्मनः का हरति। प्रत्युत्तरं· सरसिवहु-
आ। सदृशवधूका। समानगुणशीले इत्यर्थः सरसवहुआ इति पाठे तु। सरसवधूका। शृंगाररससंपन्नावधूकेत्यर्थः
कअचउचडेति

का हरइ मणं पइणो गुणगणजोव्वणसल्लाहणिज्जस्स कअ
चडचंतसद्दहुआसणा केरिसा होंति ६५ सरिसवहुआ मुद्दू
॥ प्राकृतं ॥

सद्दा· कृतचटचटेति शब्दाः हुआसणा केरिसा होंति। हुताशनाः कीदृशा भवंति। प्रत्युत्तरं। सरिसवहुआः शर्षप
हुताः। सर्षपः सिद्धार्थस्तद्धोमेनाग्निश्चटचटेति शब्दं करोति ६५ ॥ शुद्धू प्राकृतं ॥ ॥ ॥

शुद्धापभ्रंशस्योदाहरणद्वयं छाया चाह ॥ पाणीति । पाणिग्रहणनिवसनं शोभते । कैर्मण्डितं । विवाहस्य वस्त्रं कैर्मण्डितं ।
शोभते । प्रत्युत्तरं । समरंगणेहिं । समरं जनैः । तुम्बकुसुंभादिरंजन द्रव्यैरित्यर्थः । साधय । बहुवीर प्रभुः रिपुबलं कैः खण्डितं ।
साधयेति कथयेत्यर्थः । बहुवीरस्वामिनो राज्ञः शत्रुसैन्यं कैश्छिन्नं । प्रत्युत्तरं । समरंगणेहिं । संग्रामांगणैः । छइरसिकानां । स
रसानां केन उच्चाटनं क्रीयते । प्रत्युत्तरं । णीरसएण । नीरसराणेण । नीरसो माधुर्यरहितो रागो गानविशेषो यस्य सः । त

पाणिग्गहणणिवसणु । सोहइ । कोहिं । मण्डिअं साहसु बहुवीरपहु एणो । रिउबलु केहिं
खण्डिअं छइ समरंगणेहिं । रसिअहु केण । उच्चाडणु । किज्जाइ । जुअइमानसु केण उवि
ज्जाइ तिसिअलोअ । खणु । केण । सहिज्जाइ सहिपहु समभु । पणोजिज्जाइ । ६७ ।

॥ णीरसएण । शुद्धापभ्रंशं ॥

स्यातेन युवतीनां मनः केन उद्विज्यते । उद्वेगी क्रीयते । प्रत्युत्तरं । णीरसएण निर्गतो रसरागो यस्मात्स तथा तेन । तृषितो लोकः
क्षणं केन स्वस्थी क्रीयते । प्रत्युत्तरं । णीरसएण । नीरसएवेण । नीरस्य जलस्य शराव-पात्रविशेषः तेन । अपंप्रभ्रमामभुवने ।

वि·मु·दी·
६९
69

शुद्धमागधिकस्योदाहरणद्वयं व्याख्यातुमाह॥ ॥सुअलइत्ति। सुअलो मेहं पुछइ· स्फुकरो मेघं पृछति· किं पृछतीत्याह। केणहआसअ
लसुआ। केन हता सगरसुता। प्रत्युत्तरं। बलाहकविलेण। हे बलाह· कपिलेन मुनिना। पुछइ मे हेवि· तं तहा सुअलं। पृछति मेघोपि
तं· तथा स्फुकरं किं पृछतीत्याह। केण जणो· विसइ· पाआलं। केन जनो विशति पातालं· प्रत्युत्तरं। बलाहकविलेण। हे बलाहक मेघ·
बिलेन· विवरेण ६८ धवलो ज्वलैकैः शोभते धरणीस्मशानदेशस्य। प्रत्युत्तरं। णालकलं केहिं। नरकरंकैः। नरणां करंकैः

सुअलो मेहं पुछइ· पुछइ· मेहो वि· तं तहा सुअलं। केण हआस अलसुआ·केणा जणो
विसइ पाआलं ६८ बलाहकविलेण। धवलुज्जलेहिं केहिं सो हइ· धलणी· मसाणा।
देसस्स णालअस्स· रकवाला· केहिं· पलिवेढिआ होंति। ६९ णालकलंकेहिं सु·
।द्धमागधिकं।

रस्थिभिः। करंको मस्तकेस्स नालिकेरफलीस्यनीतिमेदिनिः। निरयस्यानरकस्य· रक्षकाः कैः प्रतिवेष्ठिता भवंति। प्रत्यु
त्तरं। णालकलं केहिं· नरकरंकैः। नरकस्या· रंकाः कृपणा· नरकरं कास्तैः। रंकस्तु कृपणो मन्न इति विश्वः ६९। शुद्धमागधिकं॥ राम: ६६

गुडुपैशाचिकस्योदाहरणद्वयं दर्शयामाह ॥ वैरीति । वैरी शत्रुः पृच्छति । गगने । आकाशे रोचते दीप्यते कस्सो घनः स्यामो मेघः केः । प्रत्युत्तरं । अहितपक्षेहिं । अहितपक्षैः । हे अहितः शत्रो पक्षैः पक्षिविशेषैः सच्छादृश । केहिं । समस्यांति । सत्यानि । नकैः समर्थ्यते । सच्चं इहितं कतांइपि । सत्यं निश्चितं कृतान्यपि । कृतान्यपि सत्यानि प्रयत्नादीनि निश्चितं सम्यग्मिति ज्ञात्वापि । केनै समर्थ्यते । प्रत्युत्तरं । अहितपक्षेहिं । अहितपक्षैः शत्रुवर्गै ७० । पत्तूणानि शिलधनेहताणं । निधनेरणेहतानां मध्ये । भडअणो । भटजनः शूरः

वैरीपुछइ कं कण । रोचइ कं सणो घणो । केहिं सच्चाइं णा । केहिं समत्थंति । सच्चंणि हितं कतांइपि ७० अहितपक्खेहिं ॥ पत्तूण किं भडअणो । णिधणो हताणं । अप्रसणं । फचति । चफणि सज्जणाण ॥ घोत्तूण । खोरतरस्तुकवसआइ । पावा । मोहंधआ रकरणं । लप । किं हलंति ७१ । विसमरणं गुडुपैशाचिकं

किं पत्तूणः किं प्राप्य । चफणि सज्जणाण । जनानि सदनस्येदृश्य अप्रसणं फचति । अहसितंभजति । प्रत्युत्तरं । विसमरणं । विषमं । उग्रं रणं संग्रामं प्राप्ये सर्थः । पावा । पापिनः । खोरतरतुकवसआइ घोरतरदुःखसमानि । घोत्तूण । मुक्त्वा मोहंधआर करणं । मोहान्धकारकरणं । किं । हलंति । किं लभंते । लप । वदत्यर्थः । प्रत्युत्तरं । विसमरणं विषेन । गरलेन मरणं लभंते प्राप्नुवंती

७१

मुकुलौकिकस्योदाहरणमेकेनाह॥ जोति।जाणी ःप्राणा दु॰ या· नजानाति।सिंदेमेभलि· मिदुपा विद्रूला सा· कीदकुरुचाते· वोल्ले· संभरि· वद्रे·। संभलि· संभली कुहूनी मतेसमरः।यानिद्रूपा विदुलां किमपि नजानाति सा कीदृगुच्चाते। हे संभलि· वद् ।प्रत्युत्तरं।मुते ल्लीः ह्र् तेरी।त्वं मुग्धेत्यर्थे· ह्र्तेरी तिमध्यदेशीयभाषा। जोति लसरिसवपेदुर्जाणी· पश्चिलसर्वपानपीडपितुं जानाति· कीसभणि ज्जाइकी हर्कु भण्यते· कथ्यते सोविस्मयी· स विज्ञानी।प्रत्युत्तरं।मुते ल्लि· शोभन स्त्रै लकारइ

जाणी·प्राणा दुर्सिंदेमेभलि·मा· कीसवत्लुइ·वोल्ले·संभरि· जोति लसरिसवपेदुर
जाणी· कीसभणिज्जाइ· सोविस्मयीणी।७२ मुते ल्लि।मुकुलौकिकं।संमुकुजातिः
एतावतापिदिङ्मात्रं प्रश्नानां दर्शितं मया येनयेनाहमाद्यानितद्विदस्तत्तदूह्यतां७३
इति धर्मदासकृते विदग्धमुखमंडने तृतीयः परिच्छेदः॥
त्यर्थे· मुते ल्लीति मध्यदेशभाषा ७२ मुकुलौकिकं।संमुकुजातिः।परिच्छेदमुपसंहरति।एतावतेति।प्रश्नानां दिङ्मात्रं·एकदेशं दर्शितं।प्रमत्स्वयं।७३।कामपस्यताराचंद्रेण कृताविदग्धमनोहराटीके प्रथमस्यां पूर्णोयं परिच्छेदस्तृतीयकः॥ ॥

प्रहेलिकाजातेर्लक्षणमाह ॥ अर्थीकृत्येति । यत्र प्रश्ने कमप्यर्थं प्रकटय्य स्वरूपार्थस्य वस्तुनः आर्थस्य गोपनाद्बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिकाजातिः । स्वरूपार्थस्य गोपनादिति पाठस्तु सम एवार्थः । १ । एतन्नस्या द्वैविध्यमेकेनाह । सेति । प्रश्नशासने प्रश्नग्रन्थे सा प्रहेलिका द्विधा द्विप्रकारा । सा का । आर्थी · अपरा शाब्दी ॥ अर्थविज्ञानादपूर्वार्थदर्शनादार्थी भवति । शब्दविभागतः शब्दखण्डनतः शाब्दी भवति । २ । तत्रार्थी जाते रुदाहरणमाह ॥ तरुण्येति । नितम्बस्थलं आश्रितः संगतः । तरुण्या युवत्या ·

अर्थीकृत्य बहिरर्थं स्वरूपार्थस्य गोपनात् । यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका १
सा द्विधार्थी च शाब्दी च विरंस्यामि ताः प्रश्नशासने आर्थी स्यादर्थविज्ञानाच्छाब्दी शब्द
विभागतः । २ । तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः गुरूणां सन्निधानेपि
कः कूजति मुहुर्मुहुः । ३ । पानीयकुम्भः ।

आलिङ्गितः श्लिष्टः गुरूणां श्वशुरादीनां सन्निधानेपि निकटेपि वारं वारं कः कूजति · मंजुशब्दं कः करोति । अत्रोत्तरं पानीयकुम्भः । किंचिन्न्यूनजलभृतः कुम्भः । यदेवंविधः स्यात् स्यावल्लभो भविष्यतीति बाह्यार्थः । अन्तरोर्थः पानीयकुम्भः । अस्य गोपनाद्दुर्ज्ञः प्रतीतिकरं

उदाहरणांतरमाह ।आपांडिति। आपांडुः ईषत्पांडु पीनं स्थूलं कठिनं कठोरंच· आपांडुपीनकठिनं वर्त्तुलं तेकलशाकारं· सुम·
नोहरं मनः प्रीतजनकं। सस्पृहं साकांक्षं यथास्यात्तथा· दूरतः दूरेपि करैर्हस्तैः किमाकृष्यते। प्रत्युत्तरं। पक्वबिल्वफलं।
आतरोर्थः। अस्यगोपनं कृत्वा· वाह्यार्थस्तनप्रतीतिः विशेषणांतुल्यं ४ आधीजातिः। धात्री जाते उदाहरणमाह। दुर्वीरेति
। दुःखेनवारयितुं शक्यं वीर्यं पराक्रमो यस्य स तस्य संबुद्धौ· हे दुर्वीर वीर्य· त्वयि सरूषि सकोपे सति। सपत्नः शत्रुस्तद्धृदये· प्रत्युप्ता

आपांडु पीन कठिनं वर्त्तुलं सुमनोहरं करैराकृष्यतेत्यर्थैः किं दूरेपि सस्पृहं ४ पक्व
बिल्व फलं। आधीजातिर्दुर्वार वीर्य सरुषि त्वयि का समुप्ता श्यामा सपत्न हृदये सुपयो
धराच। तुष्टे पुनः प्रशांतशत्रु सरोज सूर्ये सैवाद्य वर्णरहितावरनामकिंस्यात ।५।।

निद्रिताका। प्रत्युत्तरं। शस्त्री। छुरिका। स्यादृ स्त्री चासिपुत्री च छुरिका चासिधेनुके त्यमरः। कीदृशी। श्यामा· काला। सुष्ठुशो
भनं पयो जलं विशेषं धरतीति सुपयोधरा। पुनस्त्वयि प्रसन्ने सति। सैवशस्त्री आद्येन वर्णेन रहिता· किं नाम स्यात्। प्रत्युत्तरं।
स्त्री· युवती· कीदृशी· श्यामा· श्यामाषोडशवार्षिकीतिस्मृतेः। सुपयोधरा· सुस्तनी। कीदृशे त्वयि· प्रणतान् नृभृतां येशत्रवः तएव

शार्दूली जातेरुदाहरणांतरमाह ॥ सदेति । सर्वदा । रिमध्यापि । वैरियुक्तान । नितांतरक्तापि । नित्यं सितैव । शुक्लैव । यथोक्तवादिन्य
पि । नैव दूती । संचारिका न भवेदेव । दूतीसंचारिके समे इत्यमरः । सर्वत्र विरोधाभासः । ईदृशी कांता का नामेति । आशु निवेदय ।
मत्युत्तरं । सारिका । पक्षिविशेषः । कीदृशी । सदारिमध्या । अन्तर सारिकाशब्दे । रिकारो मध्ये यस्याः सा । नित्यं सितेव । सकारेण
इता संगतैव । साकारसहितैव । यथोक्तवादिनी । यथाश्रुतं तथा पठति एवंविधा । कांता । ककारो अंते यस्याः सा सारिकेति प्रसि
द्धं ६ ।

सदारिमध्यापि न वैरियुक्ता नितांतरक्तापि सितैव नित्यं यथोक्तवादिन्यपि नैव दूती
का नाम कांतेति निवेदयाशु ६ । सारिका । शार्दूली जातिः । खीरस-तुणसो-वहुगु
णवन्तउ-भमइ-णिरंतरु-णिच्चलहोन्तउ । तरुणिज्जइ-णउ-णा-फलु पत्तु-तसु-ओ
परिणामाणइ-पावइ-सोवि जमु ७ गुणरुक्खो ।

शार्दूली जातिः । प्राकृतेपि प्रहेलिकोदाहरणमाह ॥ खीरसइति । नीरसः पुनः सबहुगुणवान् । भ्रमति निरंतरं निश्चलो भूत्वा । तरुरि
ति गीयते न पुनः फलपत्रे तस्मिन् । सर्वत्र विरोधाभासः । जः परि जानाति । प्राप्नोति सोपि यशः । एतदनुक्तमिति शेषः । गुणरुक्खो
। गुणवृक्षः । कूपको गुणवृक्षकः इत्यमरः । वहुगुणयुक्तो नौकामध्यस्थस्तंभ इत्यर्थः ७ ।

वि॰मु॰टी॰
७२

72

उदाहरणांतरमाह॥ घरेति। गृहे गृहे च लति। सकलाप्रिया॰ जीवंति भवति वैरिणो स्मारी। द्वयोर्बध्यते॰ द्वयोर्मुच्यते॰ द्वयोः प्रकाशिनी॰ तथा जानीत॰ तथापि चार्य्यतां॰ यथा यातिन प्रेरिता॰ सर्वत्र विरोधाभासः गृहे गृहे वलती स्मारि विशेषणा विशिष्टा प्रेरितान माति तथा विधानारी॰ जानीत॰ बुध्यतां॰ मत्युत्तरं। पाशासारिः पाशानां गजदंतघटितानां॰ काष्ठनिर्मितारक्तपीतादि षोडशा

घर घर॰ चल्लर॰ सञ्चलपि प्यारी॰ जीवंती होइ॰ वैरिणो स्मारी। रवणवंधइ॰
रवणमुंचइ॰ रवणहोइ एक ल्ली॰ तर॰ जाणह॰ जइ॰ जाइ॰ णपेल्ली॰।८।
।पाशासारी। ।प्रहेलिकाजातिः।

छिकां

गोष्ठिका सारिरित्युच्यते। पाशानां सारिः पाशासारिः। कीदृशी। गृहे गृहे च लति। प्रति कोष्ठं च लति। सर्वद्यूत कृत्रिय पत्वात्सकलप्रिया। द्वयोर्गोष्ठिकांतरे णावध्यते॰ ताड्यते। द्वयोर्वद्धापि गोष्ठिकांतरेण॰ गोष्ठिकामुच्यते। द्वयोर्वैरिणो नारी॰ प्रतिवादि द्यूतकृतो॰ नारीव वशगा भवति। द्वयोः प्रकाशिनी। प्रभुभवती स्पर्धः।८। प्रहेलिका जातिः॥ रामः ७२

कालसारादिमस्मान्नकदृयन्नाह ॥ कालेति । विदग्धाः कुशलाः दुर्विदग्धानां पंडितंमन्यानां दर्पशांतये गर्वपरिहाराय ॰ अज
सारादिगूढकं ॰ अजः शिवो ॰ मारः कामः स्ताभ्यामुपलक्षितं गूढं कुर्वते । कीदृशं तत् १

कालसारादिकं हृद्यमजमारादिगूढकं । विदग्धा दुर्विदग्धानां कुर्व
ते दर्पशांतये ॥९॥

कालसारादिकं । कालगुरुं ॰ असारगुरुं वा दोषस्य तत् कालसारादिकं । हृद्यं ॰ यन्मुखनेत्रविकाराद्यंगचेष्टया मनोगतं
बुध्यते ॰ तत् हृद्यमिति आदिना ॰ पदगूढ पादगूढार्थगूढवस्तुगूढ वस्तुगूढपरिग्रहः । ९ ।

वि·मु·टी·
७३
73
द्या

कालसारजाते स्तह रस्यामाह द्वाभ्यां अनुनेतुमिति। भोवद। कश्चिद्दयितो मानिन्याः स्त्रिया अनुनेतुं प्रसादीकर्तुं पादयोरूप
नितस्तावन्नत्वं एनं तत्काले· स· भर्ता तया कस्माद्वधीरितः। अवज्ञीरितः। प्रत्युत्तरं। रजस्वलायतः। कीदृश्याः सरागचरणा
याः सरागौ· अलक्तकादिना लोहितौ चरणौ यस्याः सा· तस्याः अद्याहं पुष्पवतीनायं प्रसादकाल इतिभावः १० अवलोक्ये
ति। भोवद· काचिद्व्याधकुटुंबिनी· वध्वाः स्नुषायाः गुंजाफलविभूषितौ स्तनौ दृष्ट्वा· निःश्वस्य कस्माद्रोदितुं लग्ना वदेत्य

अनुनेतुं मानिन्या दयितश्चरणोः सरागचरणायाः पादपतितः सन्पातन्यां णाम
वधीरितः कस्मात्·१०। रजस्वलायतः। अवलोक्य स्तनौ वध्वा गुंजाफलविभूषितौ
निश्वस्य रोदितुं लग्ना कुतो व्याधकुटुंबिनी।११। असाररस्तनयो यतः। कालसा

रगुं·

त्वपः। प्रत्युत्तरं· असाररस्तनयो यतः असारो निर्बलः। सारो बलेस्थिरांशेचेत्यमरः। इदानीं मत्सुतस्य हस्तिहनने बलं नास्ति·
तेन गजमुक्ताफलभूषणाद्यभावात्पूर्वकालं संस्मृत्य रोदितुं लग्नेतिभावः ।।११।। कालसारगुप्तं ।। ।।

रामः
७३

हृद्यजाते स्त्री हरणहृद्यं गाथामाह ॥ दरेति। दरहृष्टचूतमुकुलं प्रेक्ष्य सख्या विरहिणी सखी। नमितः कंकेल्लितरुस्तः
चरणाहतः कस्मात्। सख्या वयस्यया। ईषत् चूतमुकुलमाम्रमञ्जरीं दृष्ट्वा। तथा वियोगिनीं सखीं दृष्ट्वा। अशोकवृक्षो
नमितस्तथा चूतमञ्जरतो नारतस्ताडितः कस्मात्। वद। केनापि कथितं अस्मिन्नशोके नमिते स्याः प्रियो नमितः समेष्य
त्यतः कारणादशोको नमितः। आम्रवृक्षस्य पादाघातेन पुष्पादिकं जायत इति प्रसिद्धा रीतिः। अग्रेव संतकालस्य पकामृपु

दरदिट्ठचूअमउलं पिच्छिअ सहिआए विरहिणिं सहिअं। णमिउं कंकेल्लितरू
[illegible] ओ चलणाहलेणकओ ॥१२॥ पिच्छंतमकिमि सच्छंपिच्छिअबहुआए ऋज्जि

कुसुमाइ १ मिकवअरं दंसि अ क आउ सीसे कओ दोजाइ ॥१३॥ हृद्यजातिः ॥

ष्यादिर्दृष्टोनेन विरहिण्या दुःखं भविष्यतीति हेतोराम्रस्य चरणाहतः कृतः। चरणाघातेनास्य पुष्पादिकं जातं। न पुनर्वसंत
तुनेति हृद्यार्थः ॥११॥ पिच्छंतमिति। कयाचन वध्वा कयाभिन्नाचरमतिनिमित्तं दंमेवंदंतं प्रेक्ष्य ऋ दितिः हे जाती कुसुमे दर्शयित्वा
कुतः शीर्षे शिरसि कृते जोविद्धनं वद। केनाप्युक्तं। जातीकुसुममारक्तं। चंद्रसूर्यौ जातीकुसुमोपमौ पदाःआरक्तौ। भविष्यतः

[illegible]

अजगुप्तं स्वोऽदाहरणमाह ॥ रवीति । असमा विषमा· अयुग्मा वा· रुचः कुरुचिर्दीप्तिर्यस्य स अकृचिशूलं· तस्यात्मजो यस्य सः असम
रुचः पाणिः शिवः अखिलं जगत्· विश्वं चिरमव्यात्· रक्षतु कीदृशः । रविसुतकृतगोकर्णः । रविसुतः कर्णस्तस्मिन्कृतः स्थापि
तो गोकर्णो· अश्विवर्ण्यसः । श्रुतिविषयगुणाम्बरः ॥ श्रुतेः कर्णस्य विषयः शब्दः स गुणो यस्याकाशस्य· स एवाम्बरं वस्त्रं यस्य सः

रविसुतकृतगोकर्णः श्रुतिविषयगुणाम्बरो वनात्मधरः । नरकशिराः ।
जगदखिलं चिरमव्यादसमरुक्पाणिः ॥ १४ ॥ अजगोपनं ॥

। शब्दगुणमाकाशमिति तर्कभाषा । वनात्मधरः । वनं जलं· आत्मा शरीरं यस्य स· वनात्मा· चंद्रस्तं धरतीति जीवनं भुवनं वन
मित्यमरः । नरकशिराः । नराणां कानि शिरांसि· शिरसि यस्य सः । कं शिरोंबुनोरित्यमरः । अस्मिन्श्लोके अजस्य गोपनमुक्तं । १४ ।

मारगूढश्लोकाहरणमाह ॥ कुध्रेनेति। दर्दुरहर्षकाले। दर्दुराणां भेकानां हर्षकाले। अर्थान्मेघागमे। भीमस्यानुजोऽर्जुनः स एव
गोजो महीरुहस्तं। अर्जुनवृक्षं। ककुभं भजन्तीति ये। ते। भीमानुजगोजभाजो। मयूरान्वदन्ति। नदीसर्जौ वीरतरुरिन्द्रद्रुः ककुभोऽर्जुन
इत्यमरः। दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोरिति मेदिनिः। कीदृशाः। कुं पृथ्वीं दधतीति कुध्राः शैलास्तेषामिनः स्वामी हिमाद्रिः
तस्मात्सूतिः प्रसवो यस्या। सा पार्वती। तां प्रीणातीति कुध्रेनसूप्रीः। महेशस्तस्य नयनाश्रयाशोन। नेत्राग्निनाश्यो यः कामः

कुध्रेनसूप्रीनयनाश्रयाशाद्गोत्मना दर्दुरहर्षकाले। स्वजन्म
भक्ष्यप्रियभोजनाशान्वदन्ति भीमानुजगोजभाजः ॥ १५ ॥ मारगूढं

स्तेन उन्मदा उन्मत्ताः। आशाश्रयाशौ वहद्भानुरित्यमरः। पुनः कीदृशाः। स्वजन्मानि। स्वापत्यानि। भक्षयन्तीति। स्वजन्मभक्षाः स
र्पास्तेषां प्रियो वायुः स एव भोजनं येषां ते। स्वजन्मभक्ष्यप्रियभोजनाः सर्पास्तान्। अश्नन्तीति। स्वजन्मभक्ष्यप्रियभोजनाशाः। जनुर्ज
ननजन्मानि जनिरुत्पत्तिरुद्भव इत्यमरः। अत्र मारस्य गोपनमुक्तं। उभाभ्यामजमारगूढमिति सिद्धं ॥ १५ ॥ अजमारगूढं ॥

ईश्वरगूढस्य उदाहरणमाह ॥ वातेति । ईर्लक्ष्मीस्तद्दयितो विष्णुः वो युष्माकं अघं अकल्याणं अरं शीघ्रं हरतात् दूरीकरोतु
। अरं शीघ्रे च चक्रांगे शीघ्रगे पुनरस्त्ववदिति मेदिनी । कीदृशः । वाताह्वीतिः । वातमश्नातीति वाताशः सर्पः स एव च वीतिः शयनं यस्य सः ।
अरिचक्रं दधातीत्यरीध्रः । महांतः असवः प्राणा यस्य स महासुः महाप्राणाः । महासिरिति पाठे तु महान् असिर्नंदकाभिधः ख

वाताह्वीतिररिध्रोरं वो हरतान्महासुरीदयितः । वीड्वा
ड्यानौकावार्वाहो मेघश्यामस्तनाः ।९६। ईश्वरगूढं ।

ड्गो यस्य सः । वीनां पक्षिणां वीट् स्वामी वीट् गरुडः । अपां जलानां राट् पतिः अब्राट् समुद्रः ति वीड्वाडौ । गरुडसमुद्रौ यानौक
सी वाहनस्थाने यस्य सः वीड्वाड्यानौकाः । वार्जीलं वाहो यस्य स वार्वाहः । मेघश्यामः मेघश्यामं पीतकौशेयवाससमिति स्मृ
रू१ तेः । अस्तं नीतं अनः शकटं येन सः अस्तनाः । शकटासुरभंजन इति स्मृतेः ।९६। ईश्वरगूढं ।

पादगूढश्लोकाद्दरणमाह ॥ दयावानिति । बुद्धः सुगतस्त्रिभुवनमपायात् नाशात्पापाद्वा रक्षतु । कीदृशः दयावान्दयायुक्तः अघतः
पूतः । युद्धेऽनघः । प्रबुद्धकमलमिवेक्षणं यस्य सः । पापमहन्तीति पापापहः अत्र चतुर्थपादाक्षराणि त्रिषु पादाक्षरेषु गुप्तानि तिष्ठ
न्ति ११ । उदाहरणान्तरमाह ॥ नेति । परमपुरुषः यथा स्यात्तथा स एको मुख्यः विष्णुः शिवो वा चिरकालं जयति सर्वोत्कर्षेण
वर्त्तत इत्यर्थः । ब्रह्मादिस्तवपर्यन्तप्राशितहृन्मंदिरैः मलैः । एको वसति यो देव इति पद्मपुराणं । एको देवः केशवो वा शिवो वेति भ

दयावानघतः पुद्धः प्रबुद्धकमलेक्षणः । पापापहस्त्रिभुवनं बुद्धः पाया
दपायतः ११ न सज्जति क्वचिद्दोषे प्रीणाति जगतां मनः । य एकः सपरं
श्रीमांश्चिरं जयति सज्जनः १२ पादगूढं ।

र्त्ते हरिः । सः कः । यो जगतां चराचरात्मकानां भुवनानां मनश्चित्तं प्रीणाति तर्पयति । क्वचिदपि दोषे अपराधे दोषस्वरूपे संसा
रे वा न सज्जति नाशक्तो भवति । असक्तं भक्तानं सर्वै वेतिस्मृतेः । कीदृशः एकः श्रीमान् लक्ष्मीयुक्तः सज्जनः संतः साधवः
जनानां भक्ता यस्य सः । अत्रापि चतुर्थपादाक्षराणि त्रिषु पादेषु प्रत्यक्षाणि ।१२। पादगूढं ॥ ॥ ॥

वि॰सु॰टी॰
७६
76

वस्तुगूढस्योदाहरणद्वयं द्वाभ्यामाह ॥ दृष्ट इति। काचित्सखीं ब्रूते। हे सखि॰ अद्य मां रोदयित्वागतः एवंविधो मया दृष्टः स्वप्रइतिशेषः। किं कारणं ब्रूहि। सखी वदति। हे भद्रे॰ कल्या शिनी भूपाः। कथमिति पूर्वे॰ प्राचीमतिनिर्मलां पश्य। प्रातःकालीनः स्वप्नः शीघ्रफलदः। यथा प्राची॰ पूर्वा दिक् सूर्येणाभुज्यते॰ तथा त्वमपि दयितेन रमिष्यसीति भावः १९ दक्षिणेति। दक्षिणपवनोद्विग्ना॰ संमी

दृष्टो मया सखि ब्रूहि रोदयित्वागतोऽद्य मां। भद्रे कल्याशिनी भूपाः प्राचींप
श्यातिनिर्मलां ॥१९॥ दक्षिणपवनोद्विग्नाः सम्मील दृ॰ लो चना ई॰ यहि
श्रवहूंशाउणा॰ सहीउणा॰ नीप॰ कसेवि॰ करेह॰ ढकेउं॰ ॥२०॥ वस्तुगूढं। गूढ

लितलोचने पथिकवधूः। निपुणा सखी पुनः कर्णावपिस्थगयितुं। काचन पथिकवधूः दक्षिणपवनेन मलया निलेनोद्विग्ना सती॰ लोचने निमीलयति। तदा निपुणा॰ चतुरा सखी॰ तस्याः कर्णावपिस्थगयितुं॰ मा छादयितुं॰ यत्नं करोति। मा॰ एतस्याः श्रवणपथे व

राम:
७६

स्तुतिनिंदाजातीनांलक्षणमाह ॥ स्तुतीति । तयोः स्तुतिनिंदयोरर्थस्तदर्थस्तस्य भावस्तदर्थत्वं · तस्मात्तदर्थत्वात् स्तुतिनिंदा-
जातिर्ज्ञेया । अर्थद्वयस्योदयात् द्व्यर्थं ज्ञेयं । निह्नवादपलापात्कयितस्यापिवाक्यस्य शाद्ब्याजादपह्नुतिजातिः अपलापस्तु
निह्नव इत्यमरः २। स्तुतिनिंदोदाहरणमाह ॥ बह्विति । स्तुतिपक्षे । बहवो दोषो भुजा यस्मिन्त्सः चतुर्भुजादिः । भुजबाहुप्रवे

ध

स्तुतिनिंदातदर्थत्वात्, द्व्यर्थमर्थद्वयोदयात् ॥ निह्नवात्कथितस्यापि शाद्ब्याजा
दपह्नुतिः २। बहुदोषो गुणध्वंसी गोहंता जनपीडकः कथंनु विरयो लोकमस्त
माप्तगुणोदयं २२। विस्रों स्तुतिनिंदे ॥

षोदोरित्यमरः । गुणध्वंसी · गुणातीतः । गोहंता · धेनुकासुरहंता · । जनपीडकः जनार्दनः । विः पक्षीरथो यस्य सविरथो · ग-
रुडध्वजः । अः विभुस्तं लोकं दैत्यादिपीडितं विभ्वं आप्तगुणोदयं · प्राप्तमहोदयं करोतु । निंदापक्षे विरथो भग्नरथः । आप्तगुणो

दयं २२ । निंदितौ जितसभा स्वर्थ २१
विस्रों स्तुतिनिंदे ॥

उदाहरणांतरमाह॥ सततेति। राज्ञः स्तुतिपक्षे। सततं महिताः पूज्या ये जनाः तेषु वत्सलः कृपालुस्तत्संबोधनं। हे सततमहितजनव-
त्सल। इह कलिकाले त्वं भवान् जगतो विश्वस्य परमत्यर्थं अदुःखकरः सुखकरः। कीदृशस्त्वं बहुभयकारिणी या पापक्रि-
या तया अपरिभ्रष्टः अनिंदितः। कुपतिः कोः पृथिव्याः पतिः। निंदापक्षे सततं अहितजनवत्सलः। बहुभयपापक्रियया परिभ्र-

सततमहितजनवत्सलबहुभयपापक्रियापरिभ्रष्टः इह कलिकाले कुपतिर्ज-
गतस्त्वं परमदुःखकरः २३ राजस्तुतिनिंदे। स्तुतिनिंदाजातिः। प्रसन्नवदनः श्री-
मानयं लब्धमहोदयः। करप्रचारसुभगो राजानंदयति प्रजाः २४ चंद्रभूपती ॥ ॥

ष्टो निंद्यः। कुत्सितः पतिः कुपतिः परममत्यंतं दुःखं करोतीति यः स तथा। २३ राजस्तुतिनिंदे। स्तुतिनिंदाजातिः॥ चंद्रपक्षे। कराः किर-
णास्तेषां प्रचारे शुभगः। सोमो राजा वनस्पतीनामिति। राज्ञः पक्षे करो बलिः। अन्यत्तुल्यं। २४। चंद्रभूपती॥ ॥ ॥

मूर्धस्थोदाहरणांतरमाह ॥ विनायकेति । शंकरपक्षे सर्वदा· स उमाधवो· गौरीशस्त्वामव्याद् रक्षतु· उमा कात्यायनी गौरीत्यमरः ॥ दिवु क्रीडायां· यो देवः दीव्यतीति· क्रीडापूर्वकं ब्रह्मलोकात् सहवेगां निपतंतीं· गंगां· भूमंगलीलया कपर्दकोटरे· बभार· धृतवान्। कीदृशः। विनायके गणपतौ· आहितप्रीतिर्येन सः· विनायकाहितप्रीतिः। त्रिपुराहवे सर्वे व्यर्थपराक्रमा· यदा देवा जाता· स्तदा तदुन्नने अर्थ्यः सफलो विक्रमो यस्य सः· अर्थ्यविक्रमः। विष्णुपक्षे· विनायकः। पक्षिराजो गरुडस्तस्मिन्नाहितप्रीतिर्येन सः। धर्मसंस्थापनार्थं· मत्स्यादिभिरवतारैर्दीव्यतीति देवः। यो ऽगां· गोवर्द्धननामानं शैलं· गां पृथ्वीं च बभार। सर्वं ददातीति सर्वदः। अर्थ्यो वामनावतारे· त्रिलोकाक्रमणे विक्रमः पादनिक्षेपो यस्य सः। एवंभूतो माधवो लक्ष्मीपतिस्त्वामव्यात्। २५॥

विनायकाहितप्रीतिर्योगंगां बभार यः सर्वदो माधवः स त्वामव्यादर्थ्य
र्थविक्रमः २५। शंकरवासुदेवौ मूर्धजातिः ॥

ऽपह्नुते रुद्रादहरणाद्वयमाहद्वाभ्यां॥ सीत्कारमिति। काचनचतुरनायिका॰ स्वाभिप्रायंजोपयंतीशब्द आज्ञात्मकमिव सखीं व
दति। सीत्कारं रोमांचविशेषं स्वंजनयति॰ उत्मारदयति॰ अधरं व्रणयति। सव्रणंकरोति। रोमांचं रोमहर्षतां तनोति॰ तच्चतुला
सखीवदति। हे॰ नागरि॰ नगरे समस्ते॰ कः कोपिकि मुखिलितः। पुनः शब्दाज्ञादुष्कमर्पं तिरयति। नहिनहि॰ एवंन एवं न।

सीत्कारंसंजनयति व्रणयत्यधरं तनोति रोमांचं। नागरिकः किमुमिलितो
नहिनहि सखि हैमनः पवनः। २६। रुचिरस्वरवर्णपदारसभाववतीजगन्मनो ॥ रवै५
। हरति। तत्किंतरुणी नहिनहिवाणी बाणस्य मधुरशीलस्य। २७। ऽपह्नुतिजातिः

हे सखि हैमनः पवनः। २६। रुचिरेति। रुचिराणि स्वरवर्णपदानि यस्याः सा॰ रुचिरस्वरवर्णपदा। रसाः शृंगारादयस्तेषांभा
वश्चभावास्तद्युक्ता॰ रसभाववती। जगतोविश्वस्य॰ मनश्चित्तं हरति॰ एवमुक्ते कश्चन वदति। तत्किंतरुणी। पुनर्गोपनं करोति
नहिनहि॰ मधुरशीलस्य॰ बाणनाम्नः कवेः वाणी॰ सरस्वती। तुल्यमन्यत्। २७। ऽपह्नुतिजातिः॥ ॥ ॥

विंदुमती ज्ञातेलैचरणमाह ॥ स्वरेष्विति। यस्मिन्ग्रन्थे विंदुयुक्तेषु स्वरेषु सत्सु हलां कादिहांतानां व्यंजनानां यत्अवबोधनं
ज्ञानं तं ग्रन्थविदो विंदुमदिति संज्ञां माहुः केचिद्विंदुमती मितिवदंति २८ विंदुमती प्रसंगादन्या अप्युच्यंते। मानसीति। मन

स्वरेषु विंदुयुक्तेषु हलांयदवबोधनं। तद्विंदुमदिति प्राहुः केचिद्विंदुमती मिति
२८ मानसी नाभसी त्वाद्यावुभ्यादौ न्यासतो हि या ॥ वाहुल्येनाप्रयोगात्ताने
हतासां प्रदर्शनं। २९।

सैव यस्या विन्यासः सा मानसी। नभसि आकाशे करांगुली कृत तालविशेषेण यस्याः विन्यासः सा नाभसी। इत्या याज्ञाज्ञात
योवुभ्यादौ न्यासतो ज्ञायंते। वाहुल्येनताः अप्रयोगाः प्रयोक्तृ मशक्यास्तस्मादिहग्रंथे तासां निदर्शनमुदाहरणं नास्ति २९

विंदुमत्या उदाहरणमाह॥ त्रिनयनेति। छु००००२।०।०४।०ः४।०ं ०ः ३३४ ०ी० ।००ः।००३००।०३ २०।३०००० ०।००ो
००ःः।यथात्रस्वरे ष्वपि विंदुषु॰ हलांककासटिहकारांतानां त्रिनयनेत्यादिश्लोकस्यावबोधस्तथा तत्र श्लोकानां विंदु
युक्तस्वरविन्यासेन ते ते श्लोका ज्ञेयाः। अयं प्रत्यूसिद्धुश्चंद्रः उदयति उदयाद्रिमधिरोहति। कीदृशः। त्रिनयनस्य शंभोः शिरो

॥ त्रिनयनचूडारत्नं मित्रं सिंधोः कुमुद्वतीदयितः। अयमुदयति घुसृण॥
॥ रुणारमणीवदनोपमश्चंद्रः ३० । विंदुमतीजातिः॥ ॥ ॥

रत्नं। पुनः सिंधोः समुद्रस्य मित्रं सुहृत्। कुमुद्वतीनां वल्लभः। घुसृणं कुंकुममिवारुणा मीषद्रक्तं यद्रमण्या वदनं॰ तस्योपमा य
स्मिन् स॰ घुसृणारुणारमणीवदनोपमाः कुंकुमं घुसृणं वर्णं प्रोक्तं लोहितचंदनं। काश्मीरजं च विद्वद्भिरिति हलायुधः॥ क्रमशः

क्रियागुप्तादेर्लक्षणमाह ॥ क्रियेति। यत्र प्रश्ने क्रियादिकं स्थितमपि पदसंधानकौशलात्स्फुटं प्रकटं न लक्ष्यते। यस्मात्तत् क्रिया
गुप्तादिकं। यथा दर्श्यते। आदिना कर्तृकर्मकरणगुप्तादिग्रहः ३१ तत्र क्रियागुप्तस्योदाहरणं द्वाभ्यामाह॥ राजन्निति।
हे राजन्। नवघनश्यामेत्यत्र। अवेति क्रियापदं गुप्तं। घनश्याम। मेघनील। निस्त्रिंशः खड्गस्तस्याकृष्ट्याजेत्तु मशाक्य: आक

क्रियादिकं स्थितं यत्र पदसंधानकौशलात्। स्फुटं न लक्ष्यते यस्मात्क्रियागुप्तादिकं।
यथा ३१ राजन्नवघनश्याम निस्त्रिंशाकर्षदुर्जय। आकल्पं वसुधामेनां विद्धि।
वैरिणो बहून् ३२ पुंस्कोकिलकुलस्यैते नितांतमधुरारवैः। सहकारद्रुमा रम्या।
वसंते कामपि श्रियं ३३ क्रियागुप्तं॥

ल्पं ब्रह्मायुःपर्यंतमेनां वसुधामवरक्ष। विद्धि। वैः शत्रून् तथ। खंडय। दो अवखंडने। ३२। पुंस्कोकिलकुलस्य। पिकसमूहस्य। नितांतम
धुरारवैरित्यत्राधुरिति क्रियागुप्तं। एते सहकारद्रुमा। आम्रवृक्षाः वसंते कोकिलानामारवैः कामपि। अनिर्वचनीयां श्रियमधुरिति ॥३३॥

कर्त्तृगुप्तस्योदाहरणद्वयं द्वाभ्यामाह॥ नेति। नामेति संभावनायां। धीरस्येत्यत्र धीरिति कर्त्तृगुप्तं अयमिति दृष्टिगोचरो· नरेषाः रोषं
क्रोधं· नाम· करोतु· पुरुषं· रूक्षं नवदतु· शत्रून् त्वहंतु· तथाप्यस्य वीरस्य· धीः· बुद्धिः· रखिलां महीं· रंजय· त्यनुरक्तां करोति। नाम
प्राकाश्ये· संभाव्य क्रोधोपगमकुत्सनइत्यमरः ३५। शारदिति। मनोहरमित्यत्र मन इति कर्त्तृकं। ये रनिशं निरंतरं सुकृतं पुण्यं

नकरोतु नाम रोषं नवदतु पुरुषं नहंतु वा शत्रून्। रंजयति महीमखिलां तथापि
धीरस्य वीरस्य ३५। शारदिंदुकुंदधवलं नगनिलयरतं मनोहरं देवं। येसुकृ
तं कृतमनिशं तेषामेव प्रसादयति ३६ कर्त्तृगुप्तं॥

कृतमस्ति· तेषामेवमनिष्विन्नं· हरं देवं प्रसादयति। कीदृशं हरं। शारच्चंद्रवत्· कुंदवत्· धवलं· गौरं। नगनिलयरतं
१ कैलासगिरिवासप्रियं। ३६। कर्त्तृगुप्तं।

कर्मगुप्तस्योदाहरणद्वयं छ्याख्यामाह ॥ शीकरेति। सरोजवनमारुत इत्यत्र सरइति कर्मगुप्तं जवनमारुतः वेगवत्तरोऽनिलः सरः सरोवरं · प्रक्षोभयति। कीदृशः शीकरावातेरिता · अंबुकणाः तेषामासारं वर्षणं संप्रयच्छति · प्रापयतीति · शीकरासारसंवाही। पथिकस्त्रीनिश्वासैरिव मांसलः पुष्टः · आसारो वेगवद्वर्षं इत्यमरः। ३६। सुभगेति। शमयतीत्यत्र शमितिं · कर्मगुप्तं। हे सु

सीकरासारसंवाही सरोजवनमारुतः। प्रक्षोभयति पांथस्त्रीनिश्वासैरिव मांसलः ॥
३६ सुभगत्वाननपंकजदर्शनसंजातनिर्भरप्रीतेः शमयति कुर्वन् ॥ दिवसः पुण्यवतः कस्य रमणीयः ।३७। ॥
कर्मगुप्तं ॥

भगा तवाननपंकजस्यदर्शनेन संजाता निर्भरप्रीतिर्यस्य · तादृशास्य · कस्यपुण्यवतो दिवसः शं कल्याणं कुर्वन् · अयतिं गच्छति ।३७।

वि·मु·टी·
८१
81

करणगुप्तस्योदाहरणद्वयं ह्यभ्यामाह ॥ पूतीति । दुर्वारा वारयितुमशक्या इति भ्रमे· दुर्वारा दुष्टजले नेति करणगुप्तं· १ अमी हंसाः
घनागमे· वर्षाकाले पूतिपंकमये· दुर्गंधकर्दमप्रचुरे· कासारे· तडागे· दुर्वारा· दुर्जलेन अत्यर्थं दुःखिता· मानसं मानसाख्यं·
सरो· गमिष्यंति ३८ । अहमिति । महानसात्पाकस्थानादायात· आगतोस्मीत्यत्र· महानसा· महताशकटेनेति करणगुप्तं ।

पूतिपंकमये त्वय्यं कासारे दुःखिता अमी ॥ दुर्वारा मानसं हंसा गमिष्यंति घ
नागमे ॥३८॥ अहं महानसायातः कल्पितो नरकस्तव मया मांसादिकं भु
क्तं भीमं जानीहि मां बक ३९ ॥ ॥ करणागुप्तं ॥ ॥ ॥

हे बक· अहं महताशकटेनायातोस्मि· १ मया मांसादिकं भुक्तं· मां· भीमं· वृकोदरं· भयानकं वा· जानीहि । तवहत्त्वद्यं· नराणां·
कानि शिरांसि· यस्मिन्स· नरको· नरकपाल इत्यर्थः कल्पितो निर्मितोस्ति ३९ करणागुप्तं ॥ ॥ ॥ एमः
८१

संप्रदानगुप्तस्योदाहरणद्वयं द्रुप्याभाह ॥ अंभइति। अंभोरुहमये· कमलप्रचुर इतिभ्रमे· इः कामस्तस्मै ।अयेकामायेति·
संप्रदानगुप्तं। भक्तिसंपन्ना कामिनी· वापी· पयसि स्नात्वा· सौभाग्यकाम्यया· अयेकामाय· अंभोरुहं· पुष्पं ददाति ४०
।प्रशस्त्येति। प्रशस्त्यापुरुषमार्गस्येत्यत्र प्रशस्त्यै· प्रशंसायै· इति संप्रदानगुप्तं। संमानिता आश्रितायेन सः। हेउरुषमार्ग

अंभोरुहमये स्नात्वा वापीपयसि कामिनी। ददाति भक्तिसंपन्ना पुष्पं सौ
भाग्यकाम्यया ४० प्रशस्त्यापुरुषमार्गस्य तव संमानिताश्रित। स्पृहयंति।
नके नाम गुणरत्नालय प्रभो ४१॥ ॥ संप्रदानगुप्तं

स्य· स्वधर्मस्थित तव प्रशस्त्यै· प्रशंसायै· प्रसत्यै· इति पाठे तु· तव प्रसादाय· केनाम· न स्पृहयंति· नेच्छंति· अपि तु· सर्वेपी
स्पर्धाः। यतस्त्वं· गुणरत्नालयः सद्गुणरत्नाकरः प्रभुः स्वामीच ।४१ ।संप्रदानगुप्तं ॥ ॥ ॥

ऽपादानगुप्तस्योदाहरणद्वयं श्लोकाभ्यामाह॥ शिलीमुखैरिति। अत्यंतमलिन इति। प्रथमाभूमे· अलिन इत्यपादानगुप्तं। हे वी
र· दुर्वारै वारयितुमशक्यैः शिलीमुखैः· बाणैः· बाणछलेन वदति। यतस्त्वया शिलीमुखैः· भृंगैः शत्रुर्निर्जितोऽतः कुसुमाकु
लेवनेपि· अलिनः सकाशात्· इत्यंतं विभेतीति भावः ४२ सरसीति। सरसीतोयमित्यत्र· सरसीत इत्यपादानगुप्तं। ऽप्ययंज

शिलीमुखैस्त्वयावीर दुर्वारैर्निर्जितोरिपुः। विभेत्यत्यंतमलिनो वनेपिकु।
सुमाकुले ४२ सरसीतोयमुद्धृत्यजनः कंदर्प्पकारकं। पिवत्यंभोजसुरभि॥
स्वच्छमेकांतशीतलं ४३ ऽपादानगुप्तं॥ ॥ ॥

नो· लोकः सरसीतः सरोवरात्· दर्प्पकारं· दर्प्पजनकं· कं· जलं उद्धृत्य पिवति। पानं करोति। कीदृशं· कं· स्वच्छं· निर्मलं
अंभोजसुरभि· कमलसुगंधं एकांतसीतलं· नितांतहितमित्यर्थः। तीव्रैकांतनितांतानीत्यमरः ४३। अपादानगुप्तं।

रामः
८२

अधिकरणगुप्तस्योदाहरणद्वयं द्वाभ्यामाह॥ येति। एकांत॰ रोपितप्रीतिरित्यत्र॰ अः विष्णुस्तस्मिन् ए॰ विलासिवित्यधिकरणगुप्तं। या॰ कटाक्षच्छटापातैर्मानवं पवित्रयति। सा कमलालया लक्ष्मीः एविलासावस्ति॰ कीदृशी॰ कांते भर्त्तरि रोपिता प्रीतिर्यया सा ४४ विपद्यतीति। विपद्यमानतेत्यधिकरणगुप्तं। विपदि॰ विपन्नो॰ सर्वस्येव॰ निरूक्षणस्तेजो ही

याकटाक्षच्छटापातैः पवित्रयति मानवं एकांतरोपितप्रीतिरस्ति साकमलालया ४४ विपद्यमानता सिद्धा सर्वस्यैव निरूक्षणः। तथाहि भस्मपादाभ्यां निर्वाणं हंस पंजनः ४५। अधिकरणगुप्तं॥ ॥ ॥

नस्य॰ अमानता॰ असन्मानता॰ सिद्धानिश्चिता॰ तथाहि कस्यति। अपंजनो लोकः निर्वाणं निरूक्षं॰ भस्म॰ पादाभ्यां हंति॰ ननु ब्रह्मकेनापि न हन्यते इत्यर्थः ।४५। अधिकरणगुप्तं। ॥ ॥

संबंधगुप्तस्योदाहरणं श्लोकद्वयमाह ॥ तूणीति। उद्भिन्नमुकुलेरित्यत्र आ[?]कामस्येति संबंधगुप्तं। इयं सहकारद्रुमंजरी। अतिसौरभा
न्वितत्वाद्वल्लरिः अस्मिन्मधुमासे चैत्रे। इः कामस्तस्य इः कामस्य तूणीव इषुधिरिव भाति शोभते। कीदृशी। उद्भिन्नानि मुकुला
नि कुड्मलानि यस्यां सा। पुनः कीदृशी। न्यस्ताः शिलीमुखा भृंगा वाणा वा यस्यां सा। तूणोपासंगतूणीरनिषंगा इषुधिर्द्वयोः

तूणीव मधुमासेस्मिन्सहकारद्रुमंजरी इयमुद्भिन्नमुकुले भाति न्यस्तशिली
मुखा ४६ प्राप्तमदो मधुमासः प्रवला हृक्प्रियतमो विदूरस्थः ॥ असतीयं सन्निहि
ता हा हतशीला सखी नियतं ।४७। संबंधगुप्तं ॥ ॥ ॥

तूण्यामित्यमरः ।४६। प्राप्तेति। मधुमास इति। अथ मा भ्रमे संबंधगुप्तं। काचन नवतरुणस्त्री मनस्येवं चिंतयति। मधुमासश्चैत्र
मासः स्मरहृत्कृज्जा प्रवला बलिष्ठा तथा। एतस्याः प्राप्तमदः सप्राप्तयौवनभरः प्रियतमो भर्त्ता विदूरस्थो देशांतरगतो तेः। नः२
इयमसती आसाध्वी सन्निहिता निकटवर्त्तिनी। हाविषादे। इयं सखी नियतं हतशीला शीलहीना भविष्यति ४७। संबंधगुप्तं

आमंत्रितगुप्तस्योदाहरणांतरमाह॥ सर्वज्ञेनेति। सर्वज्ञेने त्यत्र करणभूमे आमंत्रणगुप्तं हे सर्वज्ञेन· सर्वज्ञ स्वामिन्·
त्वया किंचिदविज्ञातं नास्ति। ईदृशं वचो मिथ्या असत्यमित्यर्थः। यतस्त्वं किंचिदप्यसत्यं न वेत्सि। तथा· असत्य ज्ञानात्सर्वे
नः कथमिति विंध्योक्तिः· ४८। कमलइति। कमले· इत्यत्राधिकरणभूमे· हे कमले· इत्यामंत्रणगुप्तम्। हे कमले· भंग· कं सुखं

सर्वज्ञेन त्वया किंचिन्नास्त्यविज्ञातमीदृशं मिथ्या वचस्त्वयापि त्वमसत्यं वे
त्सि न किंचिन् ४८ कमले कमले नित्यं मधु निपिब तस्त्व। भविष्यति न संदेहः
कथं दोषाकरोदये।४९। आमंत्रितगुप्तं॥ ॥ ॥

यथा स्यात्तथा मधु निपिब तस्त्व· दोषाकरश्चंद्रस्योदये· कथं भविष्यति· नात्र संदेहः यतो रात्रौ कमलसंकोचे मधुपान
विच्छेदः बंधनाद्वा कथं भवस्येवेति भावः।४९। आमंत्रितगुप्तं॥ ॥ ॥

समासगुप्तस्योदाहरणमाह ॥ विषादीति। सदारोगमित्यत्र कर्मभ्रमेदारैः सहितः सदार इति समासगुप्तं। हेवीर· जयशील·
रूपेनापि· कुत्र्नापित्वयाऽरिः शंभुनासमः कृतः। कीदृशोऽरिः विश्वादीत्येव

विषादी भैक्ष्यमश्नाति सदारोगं न मुंचति। रूपेना
पित्वयावीर शंभुनारिः समः कृतः ५० समासगुप्तं

पुक्तः। भैक्षमश्नाति· भिक्षाकदंबकं भुंक्ते। पुनः सदा सर्वकाले· रोगं क्षुत्पिपासाजनितं चिंतारूपं हृद्रोगं वा· न मुंच
ति· न त्यजति। शंभुपक्षे· विषं कालकूटमत्ति। भैक्ष्यमुक्तं। सदारः सस्त्रीकः। अगं शैलविशेषं· कैलासं न जहाति। ५०।

उपहरणान्तरमाह ॥ नित्यमिति । नित्यमाराधिते त्यत्र· नित्या· सनातना· मा· लक्ष्मीर्यस्यां· सा· नित्यमेति समासगुप्तं । कंस
स्यकंसनाम्नोसुरस्य· द्विषतो· द्वेषकृतः कृष्णस्य तनुः शरीरं । मंडलाग्रं कृपाणं गदां । ॥ ॥

नित्यमाराधिता देवैः कं[स]स्य द्विषतस्तनुः । मंडलाग्रं गदां शं
खं चक्रं जयति बिभ्रती ॥ ५ ॥ ॥ समासगुप्तम् ॥ ॥

कौमोदकीं· शंखं· पांचजन्यं· चक्रं सुदर्शनं । बिभ्रती· दधती जयति । कीदृशी तनुः । नित्यमा· नित्यलक्ष्मीका । पुनः
देवैरिंद्रादिभिराराधिता· सेविता । कौक्षेयको मंडलाग्रः करवालः कृपाणवदित्यमरः ॥ ५ ॥ समासगुप्तं ॥ ॥

नि२
लिंगगुप्तस्योदाहरणाह्रुपंछाभ्यामाह॥निलांतेति।नितांतस्वच्छहृदयमित्यत्र नितांतस्वच्छहृदितिलिंगगुप्तं।काच
न वदति।हे सखि·अयंतेप्रेयाञ्चेष्ठः समागतः।देशांतरादितिशेषः।अयं कः यश्चिरंदीर्घकालं·दर्शनप्रीत्यामिल
नानंदेन त्वां·भवतीः आलिंग्यरंस्य·रमयिष्यति।कीदृशः नितांतस्वच्छहृत्·अत्यर्थनिर्मलहृदयः।५२।कलि

नितांतस्वच्छहृदयं सखिप्रेयान्समागतः।त्वांचिरंदर्शनप्रीत्या यःसमा
लिंग्यरंस्यति।५२ कलिकालमियंतावद्गतस्यमुनेरपि।खंडयतिम
नःकोऽहंशशिखंडानुकारिणी।५३।लिंगगुप्तम्॥

स्य
केति।कलिकालमितिकर्मभ्रमे·कलिकेतिलिंगगुप्तं।इयं·अगस्त्यतरोः कलिकाकोरकं·मुनेरपि·अलंपर्याप्तंमनः खंड
यति।अहंकः।कीदृशी।शशिखंडंचंद्रशकलमनुकरोतीति·शशिखंडानुकारिणी।यथाशशिखंडेचक्रं तथाऽनस्य स्यतरोरपि कलिका चक्रा भवति।५३ लिंगगुप्तं॥

बुभवचनगुप्तस्योदाहरणमाह॥ प्रमोदमिति। सदागाहस्थ्यत्र बहुवचनभ्रमे· गाहतिसुबवचनगुप्तं। सदागहह्मेधिनो· गृहस्था
स्य· गाः अर्थः प्रमोदं जनयत्येव· कदनजनयतीतिपृच्छे: यद्धिधर्मस्य कामस्य· इमो संगतौ मिलितौ भवेतां। ५४।
तिङ्वचनगुप्तस्योदाहरणमाह। कस्मादिति। इतेयत्र तिङ्वचनगुप्तं। काचिन्नायिका· प्रियतमेन पृष्टापि· सखीषु

प्रमोदं जनयत्येव सदा गृहमेधिनः। यद्धिधर्मस्य कामस्य भवेतां सं
गताविमौ ५४। सुप्वचनगुप्तं। कस्मात्वं दुर्बलासीति सख्यस्तां परिपृ
च्छति त्वयि सन्निहिते तासु दद्यात्किं कथयोत्तरं। ५५। तिङ्वचनगुप्तं।

विद्यमानासु· लज्जया किंचिन्नो वाचेति कारणाद्दुद्विग्नमनसं नायकं दूतीवदति। हे सन्निहितसर्वदा· निकटस्थ· ननुदूरा
दागतोसि· कस्मात्वंदुर्बलासीति· त्वयितांपरिपृच्छतिसति· हेसरमः पूष्ं· इतः प्रयात· आसु सखीषु सा· इति किं उत्तरं दद्यात्क

86

मात्राच्युतकादेर्लक्षणमाह ॥ अस्य इति । यत्र मात्रादिच्युतकेऽपि सत्सु । अस्मो विद्धि नीयोऽयर्थः स्फुटः प्रकटः प्रतीयते ज्ञायते । तन्मात्राच्युतकादिकं तद्ज्ञाः प्रज्ञविदो विदुर्जानीयुः । आदिना विंदुविसर्गच्युतकादिग्रहः । ५६ । मात्राच्युतकस्योदाहरणद्वयं द्वाभ्यामाह ॥ महेति । हे जनाः खलवासात् धाम्यस्थाननिवासादतिश्रांताः संतः नीरं जलं समाश्र

अस्योऽप्यर्थः स्फुटो यत्र मात्रादिच्युतकेऽपि । प्रतीयते विदुस्तज्ज्ञास्तन्मात्राच्युतकादिकं । ५६ । महाशयमतिस्वच्छं नीरं संतापशांतये । खलवासादतिश्रांता समाश्रयत हे जनाः । ५७ । तुषारधवलस्फूर्जन्महामणिधरो घनः । नागराजो जयत्येकः पृथिवीधरणक्षमः । ५८ । मात्राच्युतकं ।

यत । नीरमित्यत्र मात्राच्युतके कृते नरं सेवत । किमर्थं । संतापशांतये । महाशयं गंभीरं । अतिस्वच्छं निर्मलं । ५७ । तुषारेति । एको नागराजः शेषो जयति । मात्राच्युतके कृते नगराजो हिमालयः घनो निविडः विशेषणान्युभयत्र तुल्यानि

मात्राच्युतकं

बिंदुच्युतकस्योदाहरणद्वयं छाभ्यामाह ॥ सुश्यामेति । ए
षा अनंगभूः कामिनी · कस्य भुजंगस्य भोक्तुं गच्छतः वेश्याप
तेः कामिनः प्रीतिं न करोति । अपि तु सर्वस्य । वेश्यापति भुजंगस्त्र्याः षिड्गः पाल्लविकोविट इत्यमरः । कीदृशी · सुश्या
मा · शोभना च षोडशवार्षिकी च । श्यामा षोडशवार्षिकी तिस्मृतेः । चंदनवती । चंदनानुलिप्ता · कांता · मनोहरा
। तिलकभूषिता । सिंदूरादितिलकालंकृता । पक्षे बिंदुच्युतके कृते · नगभूः पर्वतस्थलमृत्तिका भूमिः कस्य भुजंगस्य

सुश्यामा चंदनवती कांता तिलकभूषिता । कस्यैषानंगभूप्रीतिं भुजं
गस्य करोति न ५९ यथा सत्यसवः स्निग्धः सन्मार्गविहितस्थितिः ॥
तथा सर्वाश्रयः सत्यमयमेव कुलद्रुमः । ६० । बिंदुच्युतकं ॥ ॥

प्रीतिं न तनोति । कीदृशी । श्यामा · हरिद्वर्णा · चंदनवती · चंदनतरुभूषिता । तिलकद्रुमालंकृता । ५९ । यथेति । मेमम ·
अयं मे · वकुलद्रुमः केसरतरुर्यथा सत्यसवः । सत्समीचीनः प्रसवपुष्पोद्गमो यस्य सः । स्निग्धो मंजुलः सन्मार्गे चतुष्प
थे । विहिता स्थितिर्येन सः । तथा सर्वाश्रयः सर्वस्याश्रयः सत्यं । पक्षे · अयमेव · कुलद्रुमः कुलालंबी पुमान् । सत्यसवः
। [illegible] ॥ ६० । बिंदुच्युतकं ।

विसर्गच्युतकस्योदाहरणद्वयं दर्शयन्नाह ॥ महीति। एतेन महीरुहो वृक्षाः कलापिनां मयूराणां विहंगानां पक्षिणां। हृद्यैर्म
धुरैर्विरुतैः शब्दैः नीरवाहाय मेघाय। स्वागतानीव। स्वागतं ब्रूमहाभागागच्छत्यादिवाग्गतिर्या कुर्वतीव। विसर्गच्युतके कृते प
र्यो न गच्छति। हृद्यैः कलापिनां। हृद्यं हृत्प्रंगममं कलापिनां शीलं येषां ते। तेषां तेषां। ९१ अगस्त्यस्येति। ब्रह्मस्यंदनं

महीरुहो विहंगानामेते हृद्यैः कलापिनां विरुतैः स्वागतानीव नीरवाहाय कुर्वते ९१
अगस्त्यस्य मुनेः शापाद्ब्रह्मस्यंदनमास्थितः महासुखात्परिभ्रष्टो नहुषः सर्पतां
गतः ९२ विसर्गच्युतकं

ब्राह्मणकल्पितरथमास्थितः आसीनो नहुषो नृपः। अगस्त्यस्य मुनेः शापात् स्वात्परिभ्रष्टः आकाशात्पतितः सर्पभावं प्रा
प्तः। कीदृशः महासु। महान्तोऽसवः प्राणा यस्य सः। महासुरित्यत्र विसर्गच्युतकेऽप्यर्थो न गच्छति। महासुखात्महदैश्वर्यात्
[illegible] ९२ विसर्गच्युतकम्

॰ष्टवरसुतकस्योदाहरणद्वयं दाप्याप्याह ॥ महानिति। महानपि॰ महतामुपमानपात्रभूतोपि सुधीरोपि॰ अक्षोभ्योपि॰ रत्न
करोपि विरसः क्षारः। कुत्सितानक्रकुंभीरादयः परिवारा यस्य सः। न दीनः समुद्रः केन सेव्यते। नकेनापि इत्यर्थः। पक्षेन
दीन इत्यत्राष्टवरसुतके॰ दीनो॰ दुःखितः। सुधीरो॰ धृतिमानपि॰ बहुगुणरत्नयुतः। विरसो॰ नीरसः। कुकलत्रः। एवंविधो॰ दुः

महानपि सुधीरोपि बहुरत्नयुतोपि सन्। विरसः कुपरीवारो न दीनः केन सेव्यते ६३ सु
शीलः स्वर्णगौरांगः पूर्णचंद्रनिभाननः सुगतः कस्य न प्रीतिं तनोति हृदि संस्थितः ६४
अष्टवरसुतकं

खितः केनापि न सेव्यत इत्यर्थः ६३ सुशील इति। सुगतो बुद्धः हृदि संस्थितो ध्यानस्थः कस्य प्रीतिं न तनोति। सुगत इत्यत्राष्टसुत
के॰ सुतस्तनयः। अन्यत्सुगमं ६४ अष्टवरसुतकम् ॥ ॥ ॥ स्तूरं

वि·मु·री·
८८
88

स्यानच्युतकस्योदाहरणाद्वयं छाभ्यामाह ॥ ततोनिवित्ति(अयसौमुरारिर्विभुः त्रो(स्माकं भद्रं कल्याणं तनोतु·असावि
तिकः·पदस्यशाख्याशायनं·फणीशो बः पदस्यगतिर्गमनं·गरुत्मान्·पदस्याणगोरुहस्तेचक्रं पदस्यदृष्पिता·पद्मा·लक्ष्मीः
(पदस्यनाभ्यां·स्फुरद्विरंचिः ब्रह्मा। कीदृशोमुरारिः।अमुभ्रदेहः श्यामतनुः ९५ हरहति।अयदृत्युपेक्ष्यं कृत्वालक्ष्मा

ततोनुनोयपस्यफणीगरुत्मान्पाणौमुरारिर्दृपितांचशाख्यानाभ्यांस्फुरद्व्द्र
मभ्रुभ्रदेहः पद्मागतिश्चक्रमसौविरंचिः ९५ हरत्वपीतापकरः सुरेशः शांतो
हरिर्गोत्ररिपुर्विवस्वान् चंद्रोद्विजिह्वाश्रितदृत्युपेक्ष्य लक्ष्मावतः पातुविधि
र्जगंति ९६ स्यानच्युतकं

द्वतो·मर्त्यत्वेनस्वीकृतः।सहरिर्जगंतित्रिभुवनानिपातु।इतीतिकिं९६ हरोद्विजिह्वाश्रितः।द्विजिह्वो सर्पः स च काविसमरः
।चंद्रः·क्षयी·विवस्वान्·रविःस्तापकरः·सुरेशो·गोत्ररिपुः सुत्रामा·गोत्रभिदत्रीत्यमरः।विधिर्ब्रह्माशंतइति९६ स्या
नमच्युतकं॥

राम:
८८

अंजनच्युतकस्योदाहरणद्वयं दर्शयन्नाह ॥ भिक्षव इति । सर्वे भिक्षवः परिव्राजकाः मागधे मगधदेशे परं समर्थस्य
मायां तितिक्षायामभिसंपन्ना दृश्यंते । भिक्षवद् इत्यत्र अंजनच्युतके कृते । लक्ष्वः पुंड्रकां तारका दृश्यो मागधेष्वमा
यां । एतच्छ्लोकममभिद्वारा दृश्यंते ग्रन्थस्यार्थं ९७ सततेति । उच्चैः पदमभीप्सता पुरुषेण जिनो बुद्धः सर्वात्मना सेव्यः प

भिक्षवो रुचिराः सर्वे सुरसाः सुजनप्रियाः लभ्यायामभिसंपन्ना दृश्यंते मागधे
परं ९७ सततशीलोदयोपेता दातासुचिरमत्सरः जिनः सर्वात्मना सेव्यः पद
मुद्रैरभीप्सता ९८ अंजनच्युतकम्

से जिन इत्यत्र अंजनेन गते । इनः सूर्यः स्वामी वा सर्वात्मना । कायवाङ्मनोभिः सेव्यः उपास्यः । इनः सूर्यो यथाविश्वस्मरः
सततशीलः सत्यस्वभावः दयायुक्तः । दाता । अभयदः । सुचिरनयः । अमत्सरः सर्वभूतहितेरत इत्यर्थः ९८ अंजनच्युतकं ।

युतदत्ताद्दरासलद्धृणमाह॥ स्फोटपित्वेति। यत्रप्रश्ने किंचिरद्दूरं॰ किंचिरिस्मुक्ते व्यंजनं॰ नतुसस्वरमित्यर्थः
॰स्फोटयित्वानिष्काश्यपुनरम्यस्यदानतो॰ निक्षेपादपरोप्यर्थो भवेत्तत् युतरत्ताद्दरसंज्ञं ज्ञेयं ८९। अस्यो
दाहरणमाह। सदेति। अयंदीनो जनः अस्तमेष्यति नाशं प्राप्स्यति कीदृशः। सदागत्या॰ निरंतरं देशांतरग
मनागमनेन॰ हतउच्छ्रायः उत्सेधोयस्यसः। पुनस्तमसो मोहस्यवशतां गतः प्राप्तः विधुरेकत्वे॰ कः शि

स्फोटयित्वाद्दूरं किंचित्पुनरन्यस्य दानतः यत्रापरोभवेदर्थस्युतदत्ताद्दरं हि तत् ८९ सदागतिहतोछ्रायस्तमसोवशतां गतः अस्तमेष्यतिदीनोयं विधुरेकः शि
वंस्थितः॥९०॥

वंकल्याणंस्थितो॰ नकोपीत्यर्थः। यद्वा॰ अयंदीनो॰ दक्षशापग्रस्तो॰ विधुश्चंद्रः एकः ए[illegible]काकीतमसोंधकार
स्यवशं गतोस्तमेष्यतिदीनः स्यत्र नकारं स्फोटयित्वापकारे दत्ते॰ दीपोस्तं निर्वाणमेष्यति॰ गमिष्यति सद

उदाहरणमाह ॥ पूर्णेति । कामिनी॰ कस्य स्वांतं॰ मनः कांतमदनोत्तरं॰ कामतरलं न करोति । अपितु सर्वस्य स्वां
तं हृन्मानसं मन इत्यमरः । कीदृशी॰ पूर्णचंद्रवन्मुखं यस्याः सा । निर्मलमंबरं वासो यस्याः सा । कामिनीत्यत्र॰
ककारं स्फोटयित्वा॰ यकारे दत्ते॰ यामिनी रात्रिः । कीदृशी । पूर्णचंद्रो मुखे यस्याः सा॰ पौर्णमासीत्यर्थः । निर्म
लं॰ निरभ्रमंबरं गगनं यस्याः सा॰ रम्या॰ रंतुयोग्या ॥ ७१ ॥ च्युतदत्ताक्षरजातिः काव्यस्य ताराचंद्रेण कृता

पूर्णचंद्रमुखी रम्या कामिनी निर्मलांबरा करोति कस्य न स्वांतमेकांतमद
नोत्तरं ७१ च्युतदत्ताक्षरजातिः ४ इति श्री धर्मदासविरचिते विदग्ध
मुखमंडने चतुर्थः परिच्छेदः समाप्तमिदं विदग्धमुखमं डनम्

विदग्धमनोहरा ॥ टीकेयमस्यां पूर्णो यं परिच्छेदश्चतुर्थकः । कोपानने कानवलोकारी का कायस्थचूडाम
णिना कृतैषा ॥ तारामिधानेन सतां कवीनामाचंद्रतारं रमतां मनस्सु । इति ताराचंद्रकृता विदग्धमनोहरा समाप्ता ॥ ॥ ९० ॥
शुभमस्तु

वि

॥८६

क० ३९

को ा